No. ४३८४

Title योग सूत्र वृत्तिः
राज मार्तण्डः

Author श्री पतञ्जलिः
भोजदेवः

Extent ६३ Age १५६०

Subject ६५ योग शास्त्रं

पातंजलयोगसूत्रवृत्तिः राजमार्तण्डः

४३८४

4384

41, double!

F. = 76

५८

ॐ

पुस्तकमिदं रामचंद्रपाठकस्य

गोपीनाथेन दत्तं राघवदेवाय 8

पं॰ टू॰

१

॥ ॥ श्रीगणेशाय नमः ॥ ॐ ॥ गणपतिचरणाऽस्यां नमः ॥ ॐ ॥ देहार्द्धयोगः शिवयोः स श्रेयांसि तनोतु वः ।

दुःखापमपि यत्स्मृत्या जनः कैवल्यमश्नुते ॥ १ ॥ त्रिविधान्यपि दुःखानि यदनुस्मरणाद्बुधाः । प्रयान्ति

सद्यो विलयं तं स्तुमः शिवमश्रयं ॥ २ ॥ यस्माञ्जलिसुते फक्किः काव्यप्रवीजयत्यसौ । पुंप्रकृत्योर्वियो श्री॥

गोवियोगाद्यत्कृदितां यधां ॥ ३ ॥ जयन्ति वाचः फणिनस्तु रान्तरस्फुरत्त्रमः । ओमविनाशकृत्त्विषः ॥

विनाशमामातोऽस्मन्नतमसांसि याः सतां सदानन्दमयानि कुर्वते ॥ ४ ॥ शब्दानाममृताशमनं विदधतां

पापमञ्जलेकुर्वेनाहनिरांराजमृगांकसञ्ज्ञमपिव्यात्तस्ववतावैधकं ॥ वाकेनोवदुष्ठांमलः फणान्ततां

नद्वैवयेनोद्धृतमस्यश्रीरणमस्त्ररंगहृपतिर्वीजयंत्यश्चलाभ ॥ ५ ॥ उन्मृज्यविस्तरतुदृष्ठविक १

ल्पनालं फल्गुप्रकाममवधार्य पर्य समग्रगर्थान्॥ आर्षे पतंजलिमतविवृतिर्मयेयमातन्यते बुधजनप्रति
बोधहेतुः॥६॥ अथ योगानुशासनं॥ अनेन सूत्रेण शास्त्रस्य संबंधाभिधेयप्रयोजनान्याख्यायंते॥
अथशब्दोऽधिकारद्योतनार्थो मंगलार्थश्च। युक्तिर्योगः समाधानं। अनुशिष्यते व्याख्यायते ल
क्षणभेदोपायफलैर्येन तदनुशासनं। योगस्यानुशासनं तदाशास्त्रपरिसमाप्तेरधिकृतं बोद्धव्य
मित्यर्थः। तत्र शास्त्रस्य व्युत्पाद्यतया योगः ससाधनः सफलोऽभिधेयः। तद्व्युत्पादनं च फलं। व्यु
त्पादितस्य योगस्य कैवल्यं फलं। शास्त्राभिधेययोः प्रतिपाद्यप्रतिपादकभावलक्षणः संबंध
। अभिधेयस्य योगस्य तत्फलस्य च कैवल्यस्य साध्यसाधनभावः। एतदुक्तं भवति। व्युत्पाद्यस्य
योगस्य साधनानि शास्त्रेण प्रदर्श्यंते। तत्साधनसिद्धो योगः। कैवल्याख्यं फलमुत्पादयति। २

इ॰पां तत्र को योग इत्याह॥ ॥योगश्चित्तवृत्तिनिरोधः॥ ॥चित्तस्य निर्मलसत्त्वपरिणामरूपस्य या
वृत्तयोऽङ्गाङ्गिभावपरिणामरूपास्तासां निरोधो बहिर्मुखपरिणतिविच्छेदादन्तर्मुखतया प्रति
२ लोमपरिणामेन स्वकारणे लयो योग इत्याख्यायते। स च निरोधः सर्वासां चित्तभूमीनां सर्व
प्राणिनां धर्मः कदाचित्कस्यांचिद्भूमावाविर्भवति। ताश्च क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्ध
2 मिति। चित्तस्य भूमयः चित्तस्यावस्थाविशेषाः। तत्र क्षिप्तं रजस उद्रेकादस्थिरं बहिर्मुखत
या सुखदुःखादिविषयेषु कल्पितेषु संनिहितेषु वा रजसा प्रेरितं। तच्च सदैव दैत्यदान
वादीनां। मूढं तमस उद्रेकात्कृत्याकृत्यविभागमगणयत् क्रोधादिभिर्विरुद्धकृत्येष्वेव नि
यमितं। तच्च सदैव रक्षःपिशाचादीनां। विक्षिप्तं तु सत्त्वोद्रेकाद्वैशिष्ट्येन परिहृत्य दुःखसा

=१ एतदुक्तं भवति । रजस्तमश्च प्रवृत्ति रूपो गमनमापरापकारा निरस्ता स...

धनं सुख माधने चेव श्रद्धादिषु प्रयत्नां । तस्य स देव देवानां । एता स्त्रिस्र खिन्नावस्थानसमाधावु
पयोगि ॥४॥ एकाग्रनिरुद्धरूपे त्वे के भूम त्वोत्कर्षो यथोत्तरमवस्थितः ~~स्थैर्यं रजस्तम प्रधान सुप्रा~~
~~सत्वं प्राधान्येन निर्दिष्टस्तासामवस्थितः~~ त्वात्समाधावुपयोगीं स्त्रजितामत्वादिक्रमसंयुक्ता मव्य
यमस्तिस्रा ॥४॥ इत्येष परिसमाप्त मोरत्यं न हे पत्वे पेतदर्थं रजस्तम प्रथमसुपादानं योव
न प्रवृत्ति र्दर्शितामावन्निवृत्ति र्नैश्चक्य तदर्शयितुमिति द्वयोर्थत्वयेन प्रदर्शनं सत्वछ्र
त्वेन तदर्थं पश्चात्तदर्शनं । पञ्चस्थोत्कर्षेण उत्तरोत्तरभूमीयोगोपयोगित्याविति । अनयो र्द्वयो
रेकाग्रनिरुद्धयो र्भूमिकयो र्यः खिन्नस्थैकाग्रताया परिणामः सोयोगः ॥४॥ किमुक्तं भवति ।
एकाग्रे वहिर्वृत्तिनिरोधः ॥ निरुद्धे च सर्वासां वृत्तीनां संस्काराणामपि विलयः ॥ इत्यनयोर्वे

पां०८

वध्रस्थो योगाङ्गत्वं संयमः ॥ इदानीं सूत्रकारः स्वविहिति निरोधपदानि व्याख्यातुकामः प्रथमं चित्तस्वरूप

दर्शयितुमाह विक्षिप्तधीनं सासनोवस्थाद्रष्टुं याच्छते ॥ ॥ तदा द्रष्टुः स्वरूपेऽवस्थानं । द्रष्टुः स्वरूप

स्य तस्मिन्काले स्वरूपे चिन्मात्ररूपतायामवस्थानं स्थितिर्भवति । अयमर्थः । उत्पन्नविवेक

ख्यातेश्चित्तसंक्रमाभावात्कर्तृत्वाभिमाननिवृत्तौ भोग्यरूपपरिणामायां बुद्धावात्मनः स्वरूपे

ऽवस्थानं स्थितिर्भवति । व्युत्थानदशायां तु कथं किंस्वरूपमित्याह ॥ ॥ वृत्तिसारूप्यमितरत्र ॥ ४ ॥

इतरत्र योगादन्यस्मिन्काले वृत्तयो वक्ष्यमाणलक्षणाः । तासु सारूप्यं तद्रूपत्वं । अयमर्थ

यथा वृत्तयो वृत्तयः सुखदुःखमोहात्मिकाः प्रादुर्भवन्ति । तादृक्स्वरूप एव संवेद्यते । तथा च द

र्शने लिङ्गयुक्तः । तदेवं यस्मिन्नैकाग्र्यता परिणतिः न चितिश्चक्तेः स्वरूपप्रतिष्ठानं भवति । ३

यस्मिंश्चेन्द्रियवृत्तिद्वारेण विषयाकारपरिणते तु दृष्टश्चिदाकार एव परिलक्ष्यते यथा जल
तरंगेषु चलत्सु चंद्रश्चलन्निव प्रतिभासते तद्वत् । [illegible] । वृत्तिपदं व्याख्यातुमाह ॥
वृत्तयः पंचतय्यः क्लिष्टाः अक्लिष्टाः । वृत्तयः चित्तस्य परिणामविशेषाः । वृत्तिसमुदायल
क्षणस्य अवयविनो याश्च अवयवभूता वृत्तयः स्वरूपेण याः न तु प्रत्ययाः । एतदुक्तं भवति । पंच वृत्त
यः क्लिष्टाः अक्लिष्टाः । क्लेशैर्वक्ष्यमाणलक्षणैराक्रान्ताः क्लिष्टाः । तद्विपरीताः अक्लिष्टाः । ता ए
व पंच वृत्तयः सम्यक्स्वरूपव्याख्यायन्ते ॥ ॥ प्रमाणविपर्ययविकल्पनिद्रास्मृतयः ॥ ता आसां
क्रमेण लक्षणमाह ॥ ॥ [illegible] प्रत्यक्षानुमानागमाः प्रमाणानि ॥ अज्ञातप्रसिद्धत्वात् प्रमाण
नीं व्याख्याकारेणेदं निरूपणे नैव गतत्वात् लक्षणस्य न पृथक्कृतलक्षणं [illegible] । कृतं प्रमाणल

[illegible] दृश्यः

निर

पा० त्ताणां च अविसंवादित्वात्तं प्रमाणमिति। इंद्रियद्वारेण बाह्यवस्तूपरागाच्चित्तस्य तद्विषया सामान्य
विशेषात्मनोर्थस्य विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षं। गृहीतसंबंधाल्लिंगाल्लिंगिनि सामान्यात्म
५ नाध्यवसायोनुमानं। आप्तवचनमागमः। एवं प्रमाणरूपां वृत्तिं व्याख्याय विपर्ययरूपमाह॥
विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठं॥ अतथाभूतेर्थे तथोत्पद्यमानं ज्ञानं विपर्ययः॥ यथा शु
क्तिकायां रजतज्ञानं। अतद्रूपप्रतिष्ठमिति। तस्यार्थस्य यद्रूपं तस्मिन्रूपे न प्रतितिष्ठति। तस्यार्थस्य नमिथ
यत्पारमार्थिकं रूपं न तत्प्रतिभासयतीति यावत्। संशयोप्यतद्रूपप्रतिष्ठत्वान्मिथ्याज्ञानं। यथा पुर
स्थाणुर्वा पुरुषो वेति। विकल्पवृत्तिं व्याख्यातुमाह॥ शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः॥ श
ब्दजनितं ज्ञानमनुपतति इति शब्दज्ञानानुपाती। न कस्यचित्तथात्वमनपेक्षमाणो योध्यव ४

भासः सविकल्प इत्युच्यते। यथा पुरुषस्य चैतन्यं स्वरूपमिति। अत्र देवदत्तस्य कम्बल इतिवच्छब्दज-
नितज्ञाने षष्ठ्या भेदोऽध्यवसितो भेदः तमिहाविद्यमानमपि समारोप्य प्रवर्त्तते ऽध्यवसायः। व-
स्तुतस्तु चैतन्यमेव पुरुषः ९। निद्रां लक्षयितुमाह॥ ॥अभावप्रत्ययालम्बना वृत्तिर्निद्रा। अभाव-
प्रत्ययालम्बनं यस्याः सा तथोक्ता। एतदुक्तं भवति। या संततमुद्रिक्तत्वात्तमसः समस्तविष-
यपरित्यागेन प्रवर्त्तते वृत्तिः सा निद्रा। अस्याश्च सुखमहमस्वाप्समिति स्मृतिदर्शनात्स्मृतेश्चा-
नुभवव्यतिरेकेणानुपपत्तेर्वृत्तित्वं। स्मृतिं लक्षयितुमाह॥ ॥अनुभूतविषयासंप्रमोषः स्मृतिः।
प्रमाणेनानुभूतस्य विषयस्य योऽयमसंप्रमोषः। संस्कारद्वारेण बुद्धावुपारोहः सा स्मृतिः। त-
दत्र प्रमाणविपर्ययविकल्पा जाग्रदवस्थाः। त एव तदनुभवबलात्प्रत्यक्षायमाणाः। तदक्षसूक्ष्यं वा

त्यां २

पौं० सू मनात्मपंदर्शनं। प्रत्यक्षस्वप्नश्च। निद्रा त्वसंविद्यमानविषया। स्मृतिश्च प्रमाणविपर्ययविकल्पनि

द्रानिमित्ता। एवं वृत्तीर्व्याख्याय सोपायं निरोधं व्याख्यातुमाह॥ ॥अभ्यासवैराग्याभ्यां तन्नि

५ रोधः॥ अभ्यासवैराग्ये वक्ष्यमाणलक्षणे ताभ्यां [illegible] प्रकाशप्रवृत्तिनियमरूपाणां चित्तवृत्ती श्री

नां प्रतिहननं स निरोधः। किमुक्तं भवति। तासां निवृत्तबाह्याभिनिवेशानां अंतर्मुखतया

स्वकारण एव विलीनशक्तिरूपतयावस्थानं। तत्र विषयदोषदर्शनजेन वैराग्येण तद्वैमुख्यमु

त्पाद्यते। अभ्यासेन च सुखजनकं शांतप्रवाहप्रदर्शनद्वारेण दृढं स्थैर्यमुत्पाद्यते। इत्थं ता

भ्यां भवति वृत्तिनिरोधः॥ अभ्यासं व्याख्यातुमाह॥ ॥तत्र स्थितौ यत्नोऽभ्यासः॥ वृत्ति

रहितस्य चित्तस्य स्वरूपनिष्ठः परिणामः स्थितिः। तस्यां यत्न उत्साहः पुनः पुनस्तथात्वेन चे ५

नामि निवेशनं सभ्यास इत्युच्यते।। तस्यैव विशेषमाह।। ।।स तु दीर्घकालनैरंतर्यसत्कारासेवितो
दृढभूमिः।। स बहुकालं नैरंतर्येणादरातिशयेन च सेव्यमानो दृढभूमिः स्थिरो भवति दार्ढ्याय कल्प
वतीत्यर्थः।। ।।वैराग्यलक्षणमाह।। ।।दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैरा
ग्यं द्विविधो विषयो दृष्ट आनुश्रविकश्च। दृष्ट इहैवोपलभ्यमानः शब्दादिः देवलोकादौ वा
नुश्रविकः अनुश्रूयत इत्यनुश्रवो वेदः तत आगतमानुश्रविकः तयोर्द्वयो र
पि विषययोः परिणामविरसत्वदर्शनाद्विगतगर्धस्य या वशीकारसंज्ञा ममैते वश्या नाहमेतेषां
वश्य इति। योयं विमर्शस्तद्वैराग्यमुच्यते। तस्यैव विशेषमाह। तत्परं पुरुषख्यातेर्गुणवै
तृष्ण्यं। तद्वैराग्यं परं प्रकृष्टं। प्रथमं वैराग्यं विषयविषयं द्वितीयं गुणविषयं। उत्पन्नगुणपुरु

इ॰पा॰ सविवेकख्यात्या तारवतद्भवति। निरोधसमाधेरत्यंतानुकूलत्वात्। एवं योगस्य स्वरूपमुक्त्वा संप्रज्ञाता
६ संप्रज्ञातस्वरूपं लक्षयति। वितर्कविचारानंदास्मितारूपानुगमात्संप्रज्ञातः। समाधिरिति शेषः। स
म्यक्संशयविपर्ययादि[illegible]रहितत्वेन प्रज्ञायते प्रकर्षेण ज्ञायतेना ध्येयस्वरूपं येन स संप्रज्ञा श्री॰
तः समाधिर्भावनाविशेषः। स वितर्कादिभेदाच्चतुर्विधः सवितर्कः सविचारः सानंदः सास्मि
तश्चेति। [illegible] भावना भाव्यस्य विषयांतरपरिहारेण चेतसि पुनःपुनर्निवेशनं। भा
व्यंच द्विविधं। ईश्वरस्तत्त्वानि च। तान्यपि द्विविधानि। जडाजडभेदात्। जडानि चतुर्विंशतिः। अजडः पु
रुषः। तत्र यदा महाभूतेंद्रियाणि स्थूलानि विषयत्वेनादाय पूर्वापरानुसंधानेन शब्दार्थोल्ले
खसंभेदेन च भाव्यते तदा सवितर्कः समाधिः। अस्मिन्नेवालंबने पूर्वापरानुसं ६

५२

धानशक्तेर्लेशस्फुरत्वेन यदा भावना प्रवर्त्तते । तदा निर्वितर्कः । तन्मात्रान्तःकरणलक्षणं सूक्ष्मवि
षयमालम्ब्य तस्य देशकालधर्मावच्छेदेन यदायैदौ भावना प्रवर्त्तते । तदा सविचारः । तस्मिन्नेवाल
म्बने देशकालधर्मावच्छेदं विना धर्मिमात्रावभासित्वेन भावना क्रियमाणा निर्विचार इत्युच्यते । एवं
४ स पर्यन्तः समाधिर्ग्राह्यसमापत्तिरिति व्यपदिश्यते । यदा तु रजस्तमोलेशानुविद्धमन्तःकरणसत्वं भाव्य स ४
ते । तदा गुणभावाच्चितिशक्तेः सुखप्रकाशमयस्य सत्वस्य भाव्यमानस्योद्रेकात्सानन्दः समा
धिर्भवति । अस्मिन्नेव समाधौ ये बद्धधृतयस्तत्वान्तरं प्रधानपुरुषरूपं न पश्यन्ति । ते विगतदेहाहंकार
त्वाद्विदेहशब्दवाच्याः । इयं ग्रहणसमापत्तिः । ततः परं रजस्तमोलेशानभिभूतं शुद्धसत्वमा
लम्बनीकृत्य या प्रवर्त्तते भावना तस्यां ग्राह्यस्य सत्वस्य न्यग्भावाच्चितिशक्तेरुद्रेकात्सत्तामात्राव

स्तूपं ३

सास्मित... त्युच्यते ससमाधिः २

ह॰पा॰ ऽपत्वेन ससमाधिः शुद्धसत्वमालंबनी कृत्य या ऽवर्त्तते भावना तस्यां ग्राह्यस्य सत्वस्य न्यग्भावाच्चि
७ तिशक्तेरुद्रेकात्सत्तामात्रावशेषत्वेन सास्मित इत्युच्यते। न चाहंकारास्मितयोरभेदः शंकनीयः।
यतो यत्रांतःकरणमहमित्युल्लेखेन विषयान्वेदयति। सोहंकारः। यत्रांतर्मुखतया प्रतिलोमप श्रो॰ ८
रिणामेन प्रकृतिलीने चेतसि सत्तामात्रमवभाति सास्मिता। अस्मिन्नेव समाधौ ये कृततोषाः परं
परमात्मानं पुरुषं न पश्यंति। तेषां चेतसि स्वकारणे लयमुपगते प्रकृतिलया इत्युच्यंते। ये परं पु
रुषं ज्ञात्वा भावनायां प्रवर्त्तंते। तेषामियं विवेकख्यातिर्गृहीतसमापत्तिरित्युच्यते। तत्र सवित
र्कः समाधौ चतस्रोवस्थाः। शक्तिरूपतयावतिष्ठंते। तत एकैकस्याहाने उत्तरोत्तरावस्थाः इति ७
चतुरवस्थोयं संप्रज्ञातः समाधिः। असंप्रज्ञातमाह॥ ॥विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोन्यः। १७

व२ त्या२

विरम्यते अनेनेति विरामः। वितर्कादि चिंतात्यागः। विरामस्यासौ प्रत्ययश्चेत्यास्यासकृत्पौनः पु
न्येन चेतसि निवेशनं। तत्रया [illegible] काविहृत्तिमल्लसतातत्स्याभेतिनेतिनेति निरंतरपर्यालपर्युपासनं। तत्पू
र्वः संप्रज्ञातसमाधिसंस्कारावशेषोऽन्यस्तद्विलक्षणोऽसंप्रज्ञातः इत्यर्थः। न तत्र किंचिद्वेद्यं सं
प्रज्ञायत इत्यसंप्रज्ञातो निर्बीजः। इदं च त्रिविधचित्तस्य परिणामः। क्रमेण समाधिप्रारंभे
निरोधः। एकाग्रता च तत्र क्षिप्तमूढविक्षिप्तभूमीषु व्युत्थानं। विक्षिप्तायां [illegible] सत्त्वो[illegible]का समाधिप्रा
रंभः। निरुद्धैकाग्रे [illegible] पर्यंत भूमौ प्रति परिणामं संस्काराः। तत्र व्युत्थानजनिताः संस्काराः स ६५
माधिप्रारंभजैः संस्कारैर्हन्यंते। तज्जाश्चैकाग्रताजनिताः संस्कारा निरोधजैः। निरोधजाः

ॐ। [illegible] श्रुता० चित्र २

जा२

पां॰त्र संस्काराः क्षयं वहन्त्येते यथा सुवर्णसंवलितं ध्मायमानं सीसमात्मानं सुवर्णमलं च निर्द्द-

१ हति। एवमेकाग्रताजनितान् संस्कारान् निरोधजाः आत्मानं च निर्द्दहन्ति। तदेवं योगद्वया।

स्वरूपं सभेदं संक्षेपेणोपायं चाभिधाय विस्तरेणोपायं योगाभ्यासदर्शनपूर्वकमुपक्रम- श्रीः४।

८ ते। भवप्रत्ययो विदेहप्रकृतिलयानां। विदेहाः प्रकृतिलयाश्च वितर्कादिस्मिकाः स्वात्र

णख्याख्याताः। तेषां समाधिर्भवप्रत्ययः। भवः संसारः। स एव प्रत्ययः कारणं यस्य स भव

प्रत्ययः। अयमर्थः। आविर्भूतमात्रा एव तेऽस्मिन्संसारे तथाविधसमाधिभाजो भवन्ति। तेषां प-

रतत्त्वादर्शनात् योगानामेषां न तत्परं तत्त्वज्ञाने तद्भावनायां च संक्रिकामन महायत्नो ८

विधेय इत्युच्यते तदर्थमुपादिष्टं । तदन्येषां तु । श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषां ॥ वि
देहप्रकृतिलयव्यतिरिक्तानां योगिनां श्रद्धादिपूर्वकः । श्रद्धादयः पूर्वे उपाया यस्य स श्रद्धा
दिपूर्वकः । ते च श्रद्धादयः क्रमादुपायोपेयभावेन प्रवर्त्तमानाः सम्प्रज्ञातस्य समाधेरुपाय
तां प्रतिपद्यन्ते । तत्र श्रद्धा योगविषये चेतसः प्रसादः । वीर्यमुत्साहः । स्मृतिरनुभूतविष
५ यः यासंप्रमोषः । समाधिरेकाग्रता । प्रज्ञा ज्ञातव्यविवेकः । तत्र श्रद्धावतो वीर्यं जायते यो
गविषये उत्साहवान्भवति । सोत्साहस्य पश्चात्यासु भूमिषु स्मृतिरुत्पद्यते । तत्स्मर
णाच्च चेतः समाधीयते । समाहितचित्तश्च लावं [illegible] सम्यक् विवेकेन जानाति । तदेतत्संप्र

पा॰ सू॰ ज्ञातस्य समाधेरुपायाः ४ तच्छ्रद्धात्स्यासा तु पराद्वैराग्याज्जन्यत्वसंप्रज्ञातस्समाधिः ४ उक्तोपाय
९ वतां योगिनां उपायलघुदलदानां हां तीव्रसंवेगानामासन्नः ४ समाधिलाभः ४ समाधिफलं चे
ष्ववति संवेगः ४ क्रियाहेतुर्दृढतमः संस्कारः ४ मन्तो ञो येषाम् अधिमात्रोपायानां तांसमाधिल श्री ४
न्तः ४ समाधिफलं चासन्नं भवति शीघ्रं भवति अवधृत इत्यर्थः ४ के ते तीव्रसंवेगा इत्याह मृ ९
दुमध्याधिमात्रत्वात् तेऽपि त्रिविधाः ४ तेस्य उपायेस्यो मृदुद्वा दिलदलित्रेस्य उपायवतां त्रिविधोपे
नवति मृदुर्मध्यः संवेग अधिमात्र इत्युपायलक्षणाः ४ तत्प्रत्येकं मृदुसंवेगाः तीव्र मध्यसंवेग
तीव्रसंवेगलक्षणात्त्रिधा न्तःकेदेतनवनवयोगिनो भवन्ति मृदूपायः ४ मृदुसंवेगः ४ मध्यसंवेग

=२गम=

वे१

ः मध्यसंवेगः। तीव्रसंवेगश्च मध्योपायः। मृदुसंवेगः मध्यसंवेगः तीव्रसंगश्च। अधिमात्रोपाय
श्च। मृदुसंवेगः। मध्यसंवेगः। तीव्रसंवेगश्च। अधिमात्रोपाय। तीव्रसंवेगमहायत्नः कर्तव्य
ः इति तेदोपदेशः। इदानीमेतदुपायविलक्षणं सुखेउपायान्तरं दर्शयितुमाह॥ ॥ईश्वरः
प्रणिधानाद्वा। ईश्वरो वक्ष्यमाणलक्षणः। प्रणिधानं तत्र भक्तिविशेषः। विशिष्टमुपासनं। सर्व
क्रियाणामपि तत्रार्पणं। विषयसुखादिकं फलमनिच्छुः सर्वाः क्रियास्तस्मिन्परमगुरावर्पय
ति। तत्प्रणिधानं समाधेस्तत्फललाभस्य च प्रकृष्ट उपायः। ईश्वरस्य प्रणिधानात्समाधिलाभ इ
त्युक्तं। तत्रेश्वरस्य स्वरूपं प्रमाणं प्रभावं वाचकमुपासनाक्रमं तत्फलं च क्रमेण वक्तुमाह॥

षविशेः श्री

पो॰ सू क्लेशकर्म्मविपाकाशयैरपरामृष्टः पुरुषईश्वरः॥ क्लिश्नंतीति क्लेशाः॥ अविद्यादयो वक्ष्यमाणाः॥ वि हित

१० प्रतिषिद्धव्यामिश्ररूपाणि कर्माणि। विपच्यंत इति विपाकाः॥ कर्मफलानि जात्यायुर्भोगाः। आ

फलविपाकाच्चित्तभूमौ शेरत इत्याशया वासनाख्याः संस्काराः॥ तैरपरामृष्टं त्रिष्वपिका श्री॥

लेषु न संस्पृष्टः पुरुषविशेषः॥ अन्ये पुरुषेभ्यो विशिष्यत इति विशेषः॥ स ईश्वरः ईशन १०

शीलः॥ इच्छामात्रेण सकलजगदुद्धरणक्षमः॥ यद्यपि सर्वेषामात्मनां क्लेशादिस्पर्शो ना

स्ति तथापि चित्तगतास्तेषामुपदिश्यंते यथा योद्धृगतौ जयपराजयौ स्वामिनः॥ अस्य तु त्रि

ष्वपि कालेषु तथाविधोपि क्लेशादिपरामर्शो नास्ति। अतः स विलक्षण एव भगवानीश्वरः स्य

वियोग २

च तथाविधमैश्वर्यमनादिसत्त्वोत्कर्षात्सत्त्वोत्कर्षश्चाप्यप्रकृष्टज्ञानादेवानवाप्नयोर्न ज्ञानिरव
र्थयारितरेतराश्रयत्वं परस्परापेक्षत्वान्नेहे ज्ञानैश्वर्ये ईश्वरसत्त्वे वर्तमाने अनादि
तातेन च तथाविधेन सत्त्वेन तस्यानादिरेव संबंधः। प्रकृतिपुरुषसंयोगवियोगयोरीश्वरेच्छाव्य
तिरेकेणानुपपत्तेः। यथेतरेषां प्राणिनां सुखदुःखमोहतया विपरिणतं चित्तं निर्मले
सात्त्विके धर्मात्मप्रख्ये प्रतिसंक्रान्तं चिच्छायासंक्रान्तं संवेद्यं भवति। नैवमीश्वरस्य तत्
स्यैकेवलएव सात्त्विकः परिणामः। उत्कर्षवाननादिसंबंधेन भोग्यतया व्यवस्थितः॥
अतः पुरुषान्तरविलक्षणतया स एवेश्वरः। मुक्तात्मनां पुनः क्लेशादियोग[illegible] स्ते १

षंयुक्तचे २

उ२

पा० यू २२

श्रीक्लेशकर्मविपाकाशयैर्निवर्त्तते। अस्य पुनः सर्वदैव तथाविधत्वात्स मुक्तात्मतुल्यत्वं न ईश्वरस्यात्मनस्ते

कत्वं। तयोस्तुल्यत्वे लिङ्गालिङ्गप्रायत्वात्कार्यत्वेनात्र पपत्तेः ४ उत्कर्षापकर्षयुक्ते केवलिन इव नान

संलवतश्चयपदवाच्यः ४ स एव ईश्वरः ४ । तथैव काष्ठाप्राप्तत्वादैश्वर्यस्य सर्वप्रमाणसिद्धायप्रमाण स्वभावेश्वर स्यात् २२

माहा॥ ॥तत्र निरतिशयं सर्वज्ञत्वबीजं। तस्मिन्भगवति सर्वज्ञत्वस्य यद्बीजं अतीतानागतादि

यत्स्वाच्छात्यत्वं महत्त्वं च मूलत्वाद्बीजमिव बीजं। तत्र निरतिशयं काष्ठाप्राप्तं स्याद्यथा

स्यत्वमहत्त्वादीनां धर्माणां सातिशयानां काष्ठाप्राप्तिः ४ यथा परमाणावल्पत्वस्याक विनि

ते परममहत्त्वस्य च। एवं ज्ञानादयोऽपि चित्तधर्मास्तारतम्येन परिदृश्यमानाः ४ क्वचि

रतिशयतामासादयंति। यत्रैव तु निरतिशयाः ॥ स ईश्वरः ॥ यद्यपि सामान्यमात्रेऽनुमान

स्य पर्यवसितत्वान्न विशेषावगतिर्भवति। तथापि शास्त्रादस्य सर्वज्ञत्वादयो विशेषा

अवगंतव्याः। तस्य स्वप्रयोजनाभावे कथं प्रकृतिपुरुषयोः संयोगवियोगावापादयतीति

न शंकनीयं। तस्य कारुणिकत्वात्। भूतानुग्रह एव प्रयोजनं। कल्पप्रलयमहाप्रलये

षु निःशेषां संसारिणः पुरुषानुद्धरिष्यामीति तस्माध्यवसायः ॥ यद्यस्येष्टं तत्तस्य

प्रयोजनमिति। एवमीश्वरस्य प्रमाणमभिधाय प्रभावमाह ॥ स पूर्वेषामपि गुरुः ॥ का

लेनानवच्छेदात्। आद्यानां स्रष्टॄणां ब्रह्मादीनामपि गुरुरुपदेष्टा। यतः स कालेनानव

पा॰सू॰ क्रियाता। अस्मादिच्छा त्वां तेषां पुनरादिमत्वादस्त्रिकालेन संबंधः ॥ एवं प्राप्तान् मुक्ता उपासनो
१२ पयोगाय वाचकमाह। तस्य वाचकः ॥ प्रणवः ॥ इत्थं मुक्तस्य अस्य रूपेश्वरस्य वाचको ॥ निधाय
कः ॥ प्रकर्षेण नूयते स्तूयते नेन निनोति वा प्रणवः ओंकारः ॥ तयोरस्य वाच्यवाचकलक्ष १२
णः संबंधो नित्यः ॥ संकेतेन प्रकाश्यते। नतु केन चित्क्रियते। यथा पिता पुत्रयोर्विद्यमा
नः संबंधः ॥ अयं पिता ॥ अयं पुत्र इति केन चित्प्रकाश्यते ॥ ॥ उपासनमाह ॥ ॥ त
ज्जपस्तदर्थभावनं। तस्य सार्धत्रिमात्रस्य (स्य प्रणव) जपो यथावदुच्चारणं। तद्वाच्यस्येश्वरस्य भा
वनं। पुनः पुनश्चेतसि निवेशनं। एकाग्रताया उपायः ॥ अतः समाधिसिद्धये योगि

नाश्रणवोजप्यस्य दर्थीश्वनावनीयस्त्यकञ्जीनवति। उपासनाथ्याः ८ फलमाह। ततः ८ प्रत्यक्चेतनाधिग
मोऽप्यंतरायाभावश्च। तस्मात्प्रुपात्तदर्थभावनाद्वा योगिनः ८ प्रत्यक्चेतनाधिगमो भवति। विष
यप्रातिकूल्येन स्वांतःकरणाभिमुखं भवति। या[illegible]स्विनाहंरूपा। किं ८ स प्रत्यक्स्वभा[illegible]नना
तस्याधिगमोऽज्ञानं भवति। अंतरायावक्ष्यमाणास्तेषामभावः ८ शक्तिप्रतिबंधो भवति। अथ के
तराया इत्याशंकायामाह॥ व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रांतिदर्शनालब्ध
भूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेंतरायाः। नं एते रजस्तमोबलात्प्रवर्तमानाः ८
चित्तस्य विक्षेपा भवंति। ते चैकाग्रताविरोधिनि स्थित्वं विक्षिप्यंत इत्यर्थः। तत्र व्याधिर्धा

दे२

पा॰ यू तुवैषम्यनिमित्तो ज्वरादिः। स्त्यानमकर्मण्यता चित्तस्य। उभयकोट्यालंबनं विज्ञानं
१२ संशयः अथयोगः स्थाज्ञानवति। प्रमादोऽनवधानता समाधिसाधनेष्वौदासीन्यं। आलस्यं
कायचित्तयोर्गुरुत्वं। योगविषये प्रवृत्त्यभावहेतुः। अविरतिश्चित्तस्य विषयसंप्रयोगात्मा
गर्द्धः। भ्रान्तिदर्शनं शुक्तिकायां रजतवद्विपर्ययज्ञानं। अलब्धभूमिकत्वं कुतश्चिन्निमित्तात्स १२
माधिभूमेरलाभः। अनवस्थितत्वं लब्धायामपि समाधिभूमौ चित्तस्य तत्राप्रतिष्ठा॥
त एते समाधेरेकाग्रताया यथायोगं प्रतिपक्षत्वादन्तराया इत्युच्यंते। विक्षेपकारणान्यप्य
न्यानंतरायान्प्रतिपादयितुमाह॥ ॥दुःखदौर्मनस्यांगमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः

वः। कुतश्चिन्निमित्तादुत्पन्नेष्वेषु विक्षेपेष्वेते दुःखादयः प्रवर्त्तन्ते। तत्र दुःखं त्रिविधं राज
सः परिणामः बाधनालक्षणः। यदभिघातात् प्राणिनस्तदपघाताय प्रवर्त्तन्ते। दौर्मनस्यं
बाह्याभ्यन्तरैः कारणैर्मनसो दौःस्थ्यम्। अंगमेजयत्वं सर्वांगीणो वेपथुरासनमनःस्थैर्यस्य
बाधकः। प्राणो यद्बाह्यं वायुमाचामति स श्वासः। यत्कोष्ठ्यं वायुं निःसारयति स प्रश्वासः।
एते विक्षेपैः सह प्रवर्त्तमाना यथोदिताभ्यासवैराग्याभ्यां निरोद्धव्याः। इत्येषामु
पदेशः। सोपद्रवविक्षेपप्रतिषेधार्थमुपायान्तरमाह ॥ तत्प्रतिषेधार्थमेकत
त्त्वाभ्यासः। तेषां विक्षेपाणां प्रतिषेधार्थमेकस्मिन्कस्मिंश्चिदभिमते तत्त्वेऽभ्यास

रय ८
मन्याप

पा० ३
१४
14

ता१

खेतसि पुनः पुनः निवेशनं कुर्य्यात्। यदुक्तं तत्कठिनतायां एकाग्रतायां तद्विघ्ने पाठः प्रशम
मुपयातीति। इदानीं चित्तस्थैर्य्यसंस्कारार्थं परिकर्म्मकथनद्वारेणोपायान्तरमाह। मैत्रीकरुणा
मुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनं। मैत्री सौहा १४
र्द्दं। करुणा कृपा। मुदिता हर्षः। उपेक्षौदासीन्यं। एता यथाक्रमं सुखितदुःखित
पुण्यापुण्यवत्सु विषयेषु भावयेत्। तथा हि। सुखितेषु साध्वेषां सुखित्वमिति मैत्रीं कुर्य्या
न्नेर्ष्यां। दुःखितेषु कथं नु नामैषां दुःखनिवृत्तिः स्यादिति कृपां कुर्य्यान्न ताटस्थ्यं
। पुण्यवत्सु पुण्यानुमोदनेन हर्षं कुर्यात्। न तु किमेते पुण्यवन्त इति द्वेषं। अपुण्य

अपुण्यव
त्सु ५

वत्सुयर्ऽदासाय्यमवसावपेक्षानुमोदनैर्मद्वेषं। सूत्रेसुखदुःखादिशद्वेष्ववंतः ८ प्र
तिपादितनाः। तदेवं मिआदिपरिकर्मिणा विश्वेश्वप्रसादनिःसुखेनसमाधेराविर्भावात
वतिापरिकर्मचित्तद्वाह्यं कर्मतथाचा। निजकालेनाहत्यात्यमाणाूगाद्रिं फलेनपरका
लंतोष्वघुतिहतोष्पातां मिश्रस्यणोमूलह्विद्विधनेमासेनपंचकआतत्स्वलफलेकथं
वुर्विहीनआतं। हष्टं वर्षेण सखे किं मूलं किं वनस्थफलं। मिश्रकादिष्ववहारगाणितं
नघर निष्पत्त्येसकलितादिकर्मोपकारकत्वो[illegible]र्थनिकर्मनिष्पत्त्येप्रवर्तते। एवंरा
गद्वेषादिप्रतिपक्षभूतमैत्र्यादिभावनया सत्त्वादिनप्रसादं विश्वंसंप्रह्यानादि

पा०१ समाधियोग्यं संपद्यते। रागद्वेषावेव मुख्यान्तरायाः खेदप्रभृत्यादयश्च। तौ चेत्समुन्मूलितौ
१५ स्यातां। तदा प्रसन्नत्वान्मनसो भवत्येकाग्रता। उपायांतरमाह। प्रच्छर्दनविधार
णाभ्यां वा प्राणस्य॥ प्रच्छर्दनं यत्कोष्ठस्य वायोः प्रयत्नविशेषान्मात्राप्रमाणेन ब
हिर्निःसारणं। विधारणं (मात्राप्रमाणेनैव प्राणस्यायामो गतिविच्छेदः। स च द्वाभ्यां १५
५ स्यां प्रकाराभ्यां बाह्याभ्यंतरपूरणेन। पूरितस्य वायोस्तत्रैव निरोधेन। तदेवं रेचकपूरक
कुंभकलक्षणेन त्रिविधः प्राणायामश्चित्तस्य स्थितिमेकाग्रतायां निबध्नाति। सर्वेषामि ७२
न्द्रियवृत्तीनां प्राणप्रवृत्तिपूर्वकत्वान्मनःप्राणयोश्च स्वस्वव्यापारे परस्परमेक

निरोध
योगक्षेमत्वात्राजीव्यमानः आत्मस्थस्सर्वेन्द्रियवृत्तिनिद्धारणाविच्छिन्नैकाग्रतायां संभवति। सर्व
सर्वदोषक्षयकारित्वं चाभ्यागमे श्रूयते। दोषक्षतत्वमर्था विद्धे पट्टस्त्रयम श्राता। दोषनि
र्हरणद्वारेणोपसृष्टैकाग्रतायां सामर्थ्यम्। इदानीमुपायान्तरदर्शनोपक्षेपेण संप्रज्ञा
तस्य समाधेः पूर्वरूपं करोति। विषयवती वा प्रवृत्तिरुत्पन्ना ~~मनसः~~ स्थितिनिबन्धनीति मनसः ३४
वाक्यशेषः। विषयाणां गन्धादीनां पञ्च शब्दाद्याः ते विद्यन्ते फलत्वेन यस्याः सा विषयवती प्रवृत्तिः। म
नसः स्थैर्यं करोतीति तथा हि नासाग्रे चित्तं धारयतो दिव्यगन्धसंविदुपजायते। तालुनि रूपसंवित्
जिह्वाग्रे रससंवित्। तालुनि रूपसंवित्। विच्छेदैकाग्रतायां स्थैर्यं भवति। अभियोगश्च फ
जिह्वामध्ये स्पर्शसंवित्। जिह्वामूले शब्दसंवित्। एवं तत्तदिन्द्रियद्वारेण तत्तस्मिन् दिव्यविषये
जायमाना मासो(?)

पांश्च लमितियोगितनैष ममास्था मोत्या दनात। एवंविधस्य वोपायां न रमाषा।। विज्ञाकावाज्योति
१६ ष्मती। प्रवृत्त्रिकृत्यन्ना स्थित्रच्छ स्थितिनिबंधना इति वाक्यशेषः। ज्योतिःशब्देन मालिकः प्रकाश
उच्यते। सप्रशाङ्कोत्पन्नयान तिशायवीस्थ विघातयच्छा ऽ मा ज्योतिष्मती उद्दे निःवि ज्ञाकं विग
16 तस्तु स्वप्न प्रस्त्वास्याम बलात्कोकार न्त ऽ पूरिणामतद्रूपो यच्छा ऽ स्मा विज्ञाकावेन मनः स्थि १६
तिनिबंधना। अथ मनसः छिद्रत्यन्तम संपुट मध्ये प्रज्ञां नक कल्लोल ज्ञात्वा दधिप्रस्थं विद्धे स्थलं त्वं नग न २
वयतः घृतिज्ञा लोकास्मर्व दृष्ट्रि प विज्ञाय येन मनः स्थैर्य मृत्युषाता उपायांतरं प्रदर्श रस्दानी
न द्वारेणा संप्रज्ञातस्य समाधेर्विषयं दर्शयति।। ।। ज्ञान रागा विषयं वा विज्ञां मन

= द्वत्यकामितबाधैं(?) नैर्मनोमात्रेणैव यत्र नोक्तं स्वमात्मनः स्वरूपं । निद्राश्च भवो क्र(?) तदा
लंबनं स्म(?) यदालंबनं निद्रालंबनं वा ज्ञानमालंब्यमानं चेतसः स्थितिं करोति नानारूपत्वात् शालिनी
यस्मिन्कस्मिंश्चिद्वस्तुनि २

मनः स्थितिनिबंधनं भवतीति वाक्यार्थः ॥ वीतरागं परित्यक्तविषयासक्तं पुरुषं यद्वित्तं प
रिहृतक्लेशं तदा लंबनीकृतं चेतसः स्थितिहेतुर्भवति । एवंविधमेवोपायांतरमा
ह ॥ स्वप्ननिद्राज्ञानालंबनं वा ॥ योगिनः स्वप्नालंबनं भवति । तथा ध्यानेनापि भवतीत्यस्मि स्थि
तिप्रतिपादयितुमाह ॥ यथाभिमतध्यानाद्वा ॥ यथाभिप्रेते वस्तुनि बाह्ये चंद्रादा धा ४
वाभ्यंतरे नाडीचक्रादौ वा ध्यायमाने चेतः स्थिरं भवति । एवमुपायान्प्रदर्श्य फल
नानार्थमाह ॥ यथाभिमतध्यानाद्वा ॥ यथाभिप्रेते वस्तुनि बाह्ये चंद्रादौ वाभ्यं
तरे नाडीचक्रादौ वा ध्यायमाने चेतः स्थिरं भवति । एवमुपायान्प्रदर्श्य फल

पा॰ न॰ ग्रार्थस्माह ॥ परमाणुपरममहत्त्वान्तोऽस्य वशीकारः॥ एतन्निरुपाये स्थिरस्याचेतसा वृत्तौ योगिनः सूक्ष्म
११ विषयभावनाद्वारेण परमाण्वन्तो वशीकारः॥ अप्रतीघातो वा तद्रूपो जायते। न क्वचित्परमाणुपर्यन्त
सूक्ष्मविषये चास्य मनः प्रतिहन्यत इत्यर्थः॥ एवं स्थूलमाकाशादिपरममहत्त्वपर्यन्तं भावयतो न क्वचि १७
17 द्वृत्तमस्य प्रतीघात उत्पद्यते। सर्वत्र स्वातंत्र्यं भवतीत्यर्थः॥ एवमेतन्निरुपायैः संप्रज्ञातस्थाविषयः॥ की
दृक्स्वरूपं लक्षणं चाह॥ क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थ तदञ्जनता समा
पत्तिः॥ क्षीणा प्रिध्येर्य दृष्टयो यस्य ततो क्षीणवृत्तिस्तस्य ग्रहीतृग्रहणग्राह्येषु स्थितं द्विषविषये स्थित
त्वमिदं ज्ञानतापत्तिर्भवति। तत्स्थत्वं तत्रैव एकाग्रता। तदञ्जनत्वं तन्मयत्वं। अभोक्ता दित्ते ग्रस्यते विते विल

गा२

यच्छलाघमानस्यैवोक्तर्षस्तथाविधासमापत्तिस्वरूपः परिणामो भवतीत्यर्थः ॥ इदानीं तमाह ॥ ॥
अभिजातस्येव मणेर्यथा जात्यस्य निर्मलस्य स्फटिकमणेस्तत्तदुपाधिवशात्तत्तद्रूपतापत्तिः
एवं निर्मलस्य चित्तस्य तत्तद्भावनीयवस्तू पपरागात्तेन रूपतापत्तिः । यद्यपि ग्रहीतृग्रहणग्रा
ह्येष्विति क्तं तथापि भूमिकाक्रमवशात् ग्राह्यग्रहणग्रहीतृष्विति बोद्धव्यं । यतः प्रथमं ग्राह्यनि
ष्ठ एव समाधिस्ततो ग्रहणनिष्ठस्ततोऽस्मितामात्ररूपग्रहीतृनिष्ठः केवलस्य पुरुषस्य ग्र
हीतुर्भाव्यत्वासंभवात् । ततः स्थूलसूक्ष्मग्राह्योपरक्तं चित्तं तत्र समापन्नं भवति । एवं ग्रह
णे ग्रहीतरि च समापन्नं बोद्धव्यं । इदानीं मुक्तोपाय व समापत्ते चातुर्विध्यमिदमाह ॥
शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का ॥ श्रोत्रेन्द्रियग्राह्यः स्फोटरूपो वा शब्दः । अर्थो जा

वं२

गार

शब्दार्थस्मृतिप्रविलये प्रत्युदितस्पष्टग्राह्याकारप्रतिभासितया न्यग्भूतज्ञानांश
निर्वितर्काश्च ना पत्तिः। भेदान्तरं प्रतिपादयितुमाह॥ ४
त्यादिश। ज्ञानमात्रप्रधानाभिदृष्टिः॥ विकल्पः उक्तलक्षणैः संकीर्णा। यथा मे ने शास्त्रा दयः
परस्पराध्यासेन प्रतिभासंते। गौरिति शब्दो गौरित्यर्थो गौरिति ज्ञानमित्यनेनाकारेण साभासा
तर्का समापत्तिरुक्ता। उक्तलक्षणविपरीतां निर्वितर्कामाह। स्मृतिपरिशुद्धौ स्वरूपशून्येव
अर्थमात्रनिर्भासा निर्वितर्का। एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता। एतयैव सवित
र्कया निर्वितर्कया च समापत्त्या सविचारा निर्विचारा च व्याख्याता। कीदृशी। सूक्ष्मविषया। सूक्ष्म
तन्मात्रेन्द्रियादि विषयो यस्याः सा तथोक्ता। एतेन पूर्वस्याः स्थूलविषयत्वं प्रतिपादितं भव
ति। सा हि महाभूतालंबना। शब्दार्थविकल्पसहितत्वेन देशकालधर्माद्यवच्छिन्नः सूक्ष्मोऽर्थ
ः प्रतिभाति यस्यां सा सविचारा। देशकाल[redacted]धर्मादिरहितो धर्मिमात्रतया सूक्ष्मोऽर्थः तन्मात्र

पातं। १८ ... विचारा 18 १८

न्द्रियरूपं तथा प्रतिभाति यस्यां सा निर्विचारा ॥ एता एव सूक्ष्मविषया[या]ः किंपर्यन्तः सूक्ष्मो विषय इ
त्याह । सूक्ष्मविषयत्वं चालिङ्गपर्यवसानं ॥ सविचारनिर्विचारयोः समापत्त्योर्यत् सूक्ष्मविषयत्वमु
क्तं तदलिङ्गपर्यवसानं न क्वचिल्लीयते न वा किंचिल्लिङ्गति गमयतीत्यलिङ्गं प्रधानं । तत्पर्य
न्तं सूक्ष्मविषयत्वं । तथा हि । गुणानां परिणामे चत्वारि पर्वाणि विशिष्टलिङ्गमविशिष्टलिङ्
गं लिङ्गमात्रमलिङ्गं चेति विशिष्टलिङ्गं प्रधानं तत्पर्यन्तं सूक्ष्मविषयत्वं तथा हि चेति विशिष्ट
लिङ्गं महाभूतानि भूतानि । अविशिष्टलिङ्गं तन्मात्रेन्द्रियाणि । लिङ्गमात्रं बुद्धिरलिङ्गं प्रधानमिति ना
तः परं सूक्ष्ममस्तीत्युक्तं भवति । एतासां समापत्तीनां प्रकृतयोजनमाह ॥ ता एव सबीजः स
माधिः ॥ ता एवोक्तलक्षणाः समापत्तयः सबीजः समाधिरुच्यते । सह बीजेनालम्बनेन

इति १

पा०तं वर्त्तेत सबीजश्चायं अज्ञातश्च समाधिर्वितर्कस्य तत्। सर्वासां सालंबनत्वात्। अथैतरासां समापत्तीनां नि

१९ [redacted]र्विचारफलत्वात्। [redacted]। निर्विचारायाः फलमाह॥ ॥निर्विचारवैशार

द्येऽध्यात्मप्रसादः। निर्विचारत्वं व्याख्यातं। वैशारद्यं नैर्मल्यं। सवितर्कां स्थूलविषयामपेक्ष्य

निर्वितर्कायाः प्राधान्यं तस्या अपि सूक्ष्मविषयायाः सविचारायाः तस्या अपि निर्विकल्परूपाया १९

निर्विचारायाः श्रेष्ठ्यं। अपि निर्विचारायाः प्रकृष्टाभ्यासवशाद्वैशारद्ये नैर्मल्ये सत्यध्यात्मप्रसा

दनं समुपजायते। चित्तं क्लेशवासनारहितं। स्थितिप्रवाहयोग्यं भवति। एतदेव चित्तस्य वैशा

द्वि र रद्यं। [illegible] तस्मिन्सति किं भवतीत्याह॥ ॥ऋतंभरा तत्र प्रज्ञा॥ ऋतं सत्यं बिभर्त्ति कदाचि

दपि न विपर्ययेणाच्छाद्यते। सा ऋतंभरा प्रज्ञा तस्मिन्सति भवतीत्यर्थः। तस्माच्च प्रज्ञा संयोगि

=४ अस्यां हि प्रज्ञायां सत्यां ... नाम पि विशेषः स्फुटेनैव रूपेण वर्तते =

कालं [illegible]यथा च त्यश्यं योगी प्रकृष्टं योगं प्राप्नोति। अस्याः प्रज्ञां तरा वैलक्षण्यमाह॥ ॥श्रुतानु
मानप्रज्ञाभ्यामन्य[illegible]विषया विशेषार्थत्वात्॥ श्रुतमागमज्ञानं। अनुमानमुक्तलक्षणं। ताभ्यां
जायते प्रज्ञा सामान्यविषया। न हि शब्दलिंगयोरिंद्रियवद्विशेषप्रतिपत्तौ सामर्थ्यं। इयं पुनर्नि ४२
र्विचारवैशारद्यसमुद्भवा प्रज्ञा ताभ्यां विलक्षणा। विशेषविषयत्वात्। अस्यामेव योगि
नां परः प्रयत्नः कर्तव्य इत्युपदिष्टं भवति। अस्याः प्रज्ञायाः फलमाह॥ ॥तज्जः संस्कारोऽन्य
संस्कारप्रतिबंधी॥ तया प्रज्ञया जनितो यः संस्कारः सोऽन्यान्संस्कारान्व्युत्थानजान्समाधिजांश्च
संस्कारान्प्रतिबध्नाति। स्वकार्यकरणाक्षमान्करोतीत्यर्थः। यतस्तत्त्वरूपतयानया जनिता

पातंजि संस्काराणां बलवत्त्वादनत्वरूपप्रज्ञाजनितान्संस्कारान्बाधितुं शक्नुवंति अतस्तामेव प्रज्ञामभ्यस्येदित्युक्तं भव
२० ति एवं संप्रज्ञातं समाधिमभिधायासंप्रज्ञातं वक्तुमाह ॥ तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः ॥
तस्यापि संप्रज्ञातस्य निरोधे प्रविलये सति सर्वासां चित्तवृत्तीनां स्वकारणे प्रविलयात् या या संस्कार
H मात्रादुत्तिष्ठति तस्यां तस्यां नेति नेतीति केवलं पर्युदासनान्निर्बीजः समाधिराविर्भवति यस्मिन्सति २०
पुरुषः स्वरूपमात्रस्थोऽतिनिष्ठः शुद्धो भवति । तदत्राधिकृतस्य योगस्य लक्षणं चित्तवृत्तिनिरोधपदा निरोधप
नां च व्याख्यानमभ्यासवैराग्यलक्षणमुपा
यद्वयस्य स्वरूपं लक्षणं संज्ञाभिधाय संप्रज्ञातभेदेन योगस्य मुख्यामुख्यभेदेन योगस्य सम्यगुक्तं

नेदमुक्त्वायोगस्यासप्रदर्शनंपूर्वकाधिकारिणोपायानेप्रदर्श्यसुगमामुपायप्रदर्शनपरतयाई
श्वरस्यस्वरूपप्रमाणप्रभाववाचकोपासनाक्रमतत्फलानिनिर्णीयचित्तविक्षेपात्सहभुवश्च
दुःखादीन्विस्तरेणचतत्प्रतिषेधोपायानेकतत्वाभ्यासमैत्र्यादिप्राणायामादीन्संप्रज्ञाता
संप्रज्ञातपूर्वांगभूतान्विषयवतीप्रवृत्तिरित्यादीनाख्यायोपसंहारद्वारेणसमापत्ती
नांफलसहिताःस्वस्वविषयसहिताश्चोक्त्वासंप्रज्ञातासंप्रज्ञातयोरुपसंहारमभिधायस
वीजपूर्वकोनिर्वीजःसमाधिरभिहितइतिव्याकृतोयोगपादः॥१॥ इतिश्रीमहाराजाधिरा

पा०तं०
२१

जश्रीभोजदेवविरचितायांराजमार्तंडाभिधानायांपातंजलियोगशास्त्रवृत्तौयोगपादः१प्रथमः
नेतिदुःखप्राप्ययोगर्द्धिसिद्ध्याद्युपायेनदर्शितां।उपायाःश्चज्ञानानाथश्रद्धोक्तप्रार्थिनामथोतदेवंप्रथ
मपादेसमाहितचित्तस्यसोपायंयोगमभिधायव्युत्थितचित्तस्यापिकथमुपायाभ्याससापेक्षोपियोगः २१
सात्म्यमुपयातीतितत्साधनानुष्ठानप्रतिपादनायक्रियायोगमाह॥तपःस्वाध्यायेश्वरप्रणिधा
नानिक्रियायोगः१॥तपःशास्त्रांतरोपदिष्टंकृच्छ्रचांद्रायणादि।स्वाध्यायःप्रणवपूर्वाणांमंत्राणां
जपः।ईश्वरप्रणिधानं।सर्वक्रियाणांतस्मिन्परमगुरौफलनिरपेक्षतयासमर्पणं।एतानिक्रि

21

यायोगा इत्यस्यता। स किमर्थमित्याह। समाधिभावनार्थः क्लेशतनूकरणार्थश्च। क्लेशा वक्ष्यमाणास्ते
षां तनूकरणं स्वकार्यकरणप्रतिबंधः। समाधिरुक्तलक्षणः। तस्य भावना चेतसि पुनः पुनर्निवेश
नं। सोऽर्थः प्रयोजनं यस्य स तथोक्तः। एतदुक्तं भवति एते तपःप्रभृतयोऽभ्यस्यमानाश्चित्तगतानवि
द्यादीन्क्लेशान् शिथिलीकुर्वन्तः समाधेरुपकारकतां भजंते। तस्मात्प्रथमं क्रियायोगाव
धानपरेण योगिना भवितव्यमित्युपदिष्टं भवति। क्लेशतनूकरणार्थ इत्युक्तं। तत्र के क्लेशा
इत्याह। अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः॥३॥ अविद्यादयो वक्ष्यमाणलक्षणाः पञ्च
ते बाधनालक्षणं परितापमुपजनयन्तः क्लेशशब्दवाच्या भवंति। ते हि चेतसि प्रवर्त्तमा

पा०तं०
~~२४~~
२२

नाः संसारलक्षणां गुणपरिणामं द्रढयंति सत्यपि सर्वेषां तुल्ये क्लेशत्वे मूलत्वादविद्यायाः प्राधान्यं प्र
तिपादयितुमाह। अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणां॥ अविद्या मोहः अनात्मन्यात्मा
भिमान इति यावत् सा क्षेत्रं प्रसवभूमिरुत्तरेषामस्मितादीनां। प्रत्येकं प्रसुप्ताद्यैर्वादिभेदेन
चतुर्विधानां। यत्र यत्राविद्या विपर्ययज्ञानरूपा शिथिलीभवति तत्र क्लेशानां रागादीनां
नोद्भवो दृश्यते। विपर्ययज्ञानसद्भावे च तेषामुद्भवदर्शनात्। प्रसुप्तप्रायत्वलीनानां तनुद
स्वाश्रययोगितां विच्छिन्नोदाररूपाणां क्लेशानां विषयसंगितां छिन्नामेव मूलत्वमविद्यायाः प्र
सुप्ततनुविच्छिन्नो· ~~विच्छिन्नोदाररूपाणां क्लेशानां विषयसंगितानां छिन्नामेव मूलत्वमविद्यायाः~~ २२

22

दाराणामितिचतुर्विधेक्लेशाश्चित्तभूमौस्थिताःप्रबोधकाभावेस्वंकार्यंनारभंतेतेप्रसुप्ताइत्युच्यंतेयथा।
बालावस्थायांबालस्यहिवासनारूपेणस्थिताःअपिक्लेशाःप्रबोधकसहकार्यभावेनाभिव्यज्यंते।
तनवःयेस्वस्वप्रतिपक्षभावनयाशिथिलीकृतकार्यसंपादनशक्तयोवासनावशेषतयाचेतस्यवस्थिताःप्र
भूतांसामग्रीमंतरेणनस्वकार्यमारब्धुंक्षमाःयथाभ्यासवतोयोगिनः।विच्छिन्नाःयेतकेनचिद्बलवताक्लेशेना
भिभूतशक्तयस्तिष्ठंति।यथाद्वेषावस्थायांरागःरागावस्थायांवाद्वेषःनह्यनयोःपरस्परविरुद्धयोर्युगपत्संभवो
स्ति।उदारास्तेयेप्राप्तसहकारिसंनिधयःस्वंस्वंकार्यमभिनिर्वर्त्तयंति।यथासदैवयोगप्रतिपंथिनोव्युत्थानदशा
यां।एषांप्रत्येकंचतुर्विधानामपिमूलभूतत्वेनस्थिताप्यविद्यान्वयित्वेनप्रतीयते।नहिक्वचिदपिक्लेशानांविप

र्या सा स्वयं निरपेक्षाणीश्व द्रूपस्तूपलभ्यते।तस्यां हि मिथ्यारूपायां सम्यग्ज्ञानेन निवर्त्तितायां दग्धबीजकल्पानामे
षां न क्वचित्प्ररोहोस्तीति अविद्यानिमित्तत्वमविद्यान्वयश्चैषामिति प्रतीयते।अतः सर्वेप्यविद्याव्यपदेशभाजः।सर्वेषां च। अप्र
क्लेशानां चित्तविक्षेपकारित्वाद्योगिना प्रथममेव तदुच्छेदे यत्नः कर्त्तव्य इति।अविद्याया लक्षणमाह।अनित्या
२३ शुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या॥अतस्मिंस्तदिति प्रतिभासोऽविद्येति अविद्यायाः सामान्यलक्षणम्।
तस्या एव भेदप्रतिपादनं।अनित्येषु घटादिषु नित्यत्वाभिमानोऽविद्येत्युच्यते।एवमशुचिषु कायादिषु शुचित्वा
भिमानः दुःखेषु च विषयेषु सुखाभिमानः।अनात्मनि शरीरे आत्माभिमानः।एतेनापुण्ये पुण्यभ्रमोऽनर्थे चा २२
र्थभ्रमो व्याख्यातः॥अस्मितां लक्षयितुमाह।दृग्दर्शनशक्त्योरेकात्मतेवास्मिता॥दृक् पुरुषः।दर्शनश

क्तिः रजस्तमोरूपा मनसि भूतः सात्त्विकः परिणामोऽन्तःकरणरूपः तयोर्भोग्यभोक्तृत्वेन जडाजडत्वेनात्यंतभिन्नरूपयो
रेकताभिमानोऽस्मितेत्युच्यते। यथा प्रकृतिर्विकृतः कर्तृत्वभोक्तृत्वरहितापि कर्त्र्यहं भोक्त्र्यहमिति अभिमन्यते सोयम।
स्मिताख्यो विपर्यासः क्लेशः। रागस्य लक्षणमाह। सुखानुशयी रागः। सुखमनुशेत इति सुखानुशयी। सुखज्ञस्य सुखा
नुस्मृतिपूर्वकः सुखसाधने तृष्णारूपो गर्धो रागसंज्ञः क्लेशः। द्वेषस्य लक्षणमाह। दुःखानुशयी द्वेषः। दुःखमनुक्र
लक्षणो। तदभिज्ञस्य स्मृतिपूर्वकं तत्साधने घतनिलूपतो यो निंदासहद्वेषलक्षणः क्लेशः। अभिनिवेशमाह। स्वरस
वाही विदुषोपि तथारूढोऽभिनिवेशः। पूर्वजन्मानुभूतमरणदुःखानुभववासनाबलाद्भयरूपः समुपजायमानः
शरीरविषयादिभिर्मम वियोगो माभूदित्यन्वहमनुबंधरूपः सर्वस्यैवाक्रिमेर्ब्रह्मपर्यंतं निमित्तं विनाप्रवर्तमानोऽभि
निवेशाख्यः क्लेशः। तदेवं क्लेशानस्य क्लेशात्मकत्वादेकाग्रतार्थी मनसपयमी क्लेशाः परिहर्तव्याः। नचाज्ञातानांतेषा।

परिहारः शक्यः कर्तुमिति तज्ज्ञानाय तेषामुद्देशोद्देशविभागलक्षणान्यभिधाय स्थूलसूक्ष्मभेदभिन्नानां तेषां प्रहाणो
पायविभागमाह। ते प्रतिप्रसवहेयाः सूक्ष्माः। ते सूक्ष्माः क्लेशा ये वासनारूपेणावस्थिताः न वृत्तिरूपं परिणाममारब्धास्ते
ते प्रतिप्रसवेन प्रतिलोमपरिणामेन हेयास्त्यक्तव्याः स्वकारणेऽस्मितायां कृतार्थं सवासनं चित्तं यदा प्रविष्टं भवति
तदा कुतस्तेषां निर्मूलानां संभवः। स्थूलानां हानोपायमाह। ध्यानहेयास्तद्वृत्तयः। तेषां क्लेशानामारब्धकार्याणां याः सु
खदुःखमोहात्मिकाः वृत्तयस्ताः ध्यानेनैव चित्तैकाग्रतालक्षणेन हेयाः। हातव्या इत्यर्थः। चित्तपरिकर्माभ्यासमात्रेण
वृस्थूलत्वात्तासां निवृत्तिर्भवति। यथा वस्त्रादेर्घनः स्थूलो मलः प्रक्षालनमात्रेणैव निवर्त्तते। यस्तु तत्र सूक्ष्मः स तैः सोपा
यैः कैश्चिन्न स्पृश्यतीति निरोधेनैव निवर्तयितुं शक्यते। एवं क्लेशानां तत्त्वमभिधाय कर्माशयस्याभिधातुमाह। क्लेशमूलः कर्मा
शयो दृष्टादृष्टजन्मवेदनीयः। कर्माशय इत्यनेन तस्य स्वरूपमभिहितं यतो वासनारूपाण्येव कर्माणि। क्लेशमूल इत्यनेन

२५ कीय २ २४ २

न कारणमस्ति हि ते यतः कर्म्मणी शुक्लाशुक्लानां क्लेशा एव निमित्तं दृष्टादृष्टजन्मवेदनीय इत्यनेन फलमुक्तं । अस्मिन्नेव जन्मन्यनुभवनीयो दृष्टवेदनीयः । जन्मांतरानुभवनीयो ऽदृष्टजन्मवेदनीयः । तथा हि कानिचित्पुण्यानि कर्म्माणि देवताराधनादीनि तीव्रसंवेगेन कृतानीहैव जन्मनि फलं जात्यायुर्भोगलक्षणं प्रयच्छंति । यथा नंदीश्वरस्य भगवन्महेश्वराराधनबलादिहैव जन्मनि जात्यादयो विशिष्टाः प्रादुर्भूताः । एवमन्येषां विश्वामित्रादीनां तपःप्रभावाज्जात्यायुषी । केषांचिज्जातिरेव । यथा तीव्रसंवेगेन दुष्टकर्मकृतां नहुषादीनां जात्यंतरादिपरिणामः । उर्वश्याश्च कार्त्तिकेयवने लतारूपतया । एवं व्यस्तसमस्तरूपत्वेन यथायोगं योज्यं । इदानीं कर्म्माशयस्य फलमाह । सति मूले तद्विपाको जात्यायुर्भोगाः ॥ मूलमुक्तलक्षणाः क्लेशाः । तेष्वनभिभूतेषु सत्सु कर्म्मणां कुशलाकुशलरूपाणां विपाकः फलं जात्यायुर्भोगा भवंति । जातिर्मनुष्यत्वादिः । आयुश्चिरकालं शरीरसंबंधः । भोगा विषया इंद्रियाणि सुखसंवित्कर्म

करणलाभसामर्थ्यकत्वात्त्योगशब्दः। इदमत्र तात्पर्यं। चित्तभूमावनादिकालसंचिताः कर्मवासना यथा यथा पाक-
मुपयांति। तथा तथा गुणप्रधानभावेन स्थिता जात्यायुर्भोगलक्षणं स्वकार्यमारभंते। उक्तानां कर्मफलत्वेन जात्यादी-
25 नां स्वकारणकर्मानुसारेण कार्यकर्तृत्वमाह। ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात्। ह्लादः सुखं परितापो
दुःखं ह्लादपरितापौ फलं येषां ते तथोक्ताः। पुण्यं कुशलं कर्म। तद्विपरीतमपुण्यं ते पुण्यापुण्ये कारणं येषां ते भा-
वस्तस्मात्। एतदुक्तं भवति। पुण्यकर्मारब्धा जात्यायुर्भोगा ह्लादफलाः। अपुण्यकर्मारब्धाः परितापफलाः। एतच्च
प्राणिमात्रापेक्षया द्वैविध्यं। योगिनस्तु सर्वं दुःखमित्याह। परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव २५
२ पारि सर्वं विवेकिनः। परिज्ञातक्लेशादिविवेकस्य दृश्यमानं सकलमेव भोगसाधनं सविषस्वाद्वन्नवद्दुःखमेव प्रतिकूल-
वेदनीयमित्यर्थः। यस्मादत्यंताभिजातो योगी दुःखलेशेनाप्युद्विजते। यथाक्षिपात्रमूर्णातंतुस्पर्शमात्रेणैव महतीं पी-

ज्ञामदुर्भवति।नेतरस्य।तथाविवेकीस्वल्पदुःखानुबन्धेनापिविरज्यते।कथमित्याहपरिणामतापसंस्कारदुःखैर्वि
षयाणामुपभुज्यमानानांयथायथंगर्द्धाभिवृद्धेःसदाप्रातिकूल्यतश्चदुःखत्वात्परिहार्यत्वाद्दुःखत्वेतरसाधनत्वाच्च
स्यैवदुःखरूपतेतिपरिणामदुःखत्वं।उपभुज्यमानेसुखसाधनेतत्प्रत्यर्थिनिप्रतिद्वेषस्यसर्वदैवावस्थितत्वा
त्सुखानुभवकालेपितापदुःखंदुःपरिहारमितितापदुःखता।संस्कारदुःखत्वंचाभिमतानभिमतविषयसंनिधा
नेसुखसंविद्दुःखसंविच्चोपजायमानातथाविधमेवस्वक्षेत्रेसंस्कारमारभते।संस्काराश्चपुनस्तथाविधसंविदुद्भव
इत्यपरिमितसंस्कारोत्पत्तिद्वारेणसंसारानुच्छेदात्सर्वस्यैवदुःखत्वं।गुणवृत्तिविरोधाच्चेति।गुणानांसत्वरजस्तमसांया
वृत्तयःसुखदुःखमोहरूपाःपरस्परमभिभाव्याभिभावकत्वेनविरुद्धाजायन्ते।तासांसर्वत्रैवदुःखानुवेधाद्दुःखत्वं।प
तद्दुःखंभवति।एकीतिकीमात्र्येतिकीदृग्दुःखनिवृत्तिनिमित्ततोविवेकिनउक्तरूपकारणचतुष्टयेयावत्सर्वेविषयादुः

स्वरूपतया प्रतिभातीति तस्मात्सर्वं कर्मविपाको दुःखरूप एव विवेकिनो भवतीति तदेवं सकलस्य क्लेशकर्माशयविपा
कराशेरविद्याप्रबलत्वादविद्यायाश्च मिथ्याज्ञानरूपतया सम्यग्ज्ञानोच्छेद्यत्वात्सम्यग्ज्ञानस्य च ससाधनस्य हे
योपादेयावधारणरूपत्वात्तदभिधानायाह हेयं दुःखमनागतम् भूतस्यातिक्रान्तत्वादनुभूयमानस्य च क्ष
णान्तरे ऽनागतमेव संसारदुःखं हातव्यमित्युक्तं भवति। हेयहेतुमाह द्रष्टृदृश्ययोः संयोगो हेयहे
26 तुः द्रष्टा चिद्रूपः पुरुषः दृश्यं बुद्धिसत्त्वं तयोरविवेकख्यातिपूर्वको यो ऽसौ संयोगो भोग्यभोक्तृत्वेन संनिधानं २६
स हेयस्य दुःखस्य गुणपरिणामस्य संसारस्य हेतुः कारणम्। तन्निवृत्त्या संसारनिवृत्तिर्भवतीत्यर्थः। इदानी

स्य स्वर

स्मारस्तिर्हाशिर्लचित्तोऽस्यर्थः। दृष्टृदृश्ययोः संयोगो हेतुः। तत्र दृष्टृदृश्यस्य स्वरूपं कार्यं प्रयोजनं चा-
ह। प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यं प्रकाशः सत्त्वधर्मः। क्रिया
प्रवृत्तिरूपा रजसः। स्थितिर्नियमरूपा तमसः। ताः प्रकाशक्रियास्थितयः शीलं स्वाभावि-
कं स्वरूपं यस्य तत्तथाविधमिति दृश्यरूपमस्यानिर्दिष्टं। भूतेन्द्रियात्मकमिति। भूतानि स्थूलसू-
क्ष्माणि जलादीनि पृथिव्यादीनि गन्धतन्मात्रादीनि च। इन्द्रियाणि बुद्धीन्द्रियकर्मेन्द्रियान्तःकरणभे-
देन त्रिविधानि। उभयमेतद्ग्राह्यग्रहणरूपमात्मा स्वरूपाभिन्नं परिणामो यस्य तत्तथाविध-
२म मिति। किं तेन कार्यमित्याह। भोगः कथितलक्षणः। अपवर्गो विवेकख्यातिपूर्विका सं-
सारनिवृत्तिः। तौ भोगापवर्गावर्थः प्रयोजनं यस्य तत्तथाविधं दृश्यमित्यर्थः। तस्य च दृश्य-

पा तं० ष्यमानानावस्थास्वरूपपरिणामात्मकत्वाद्दृश्यत्वेन ज्ञातव्यत्वाद्दवस्थाः कथयितुमाह । विशेषाविशेषलिं

२३ गमात्रालिंगानि गुणपर्वाणि ॥ गुणानां पर्वाण्यवस्था । विशेषाः स्वत्वावज्ञातव्याः इत्युपदिष्टं भवति ।

३ पा तत्र विशेषा महाभूतेन्द्रियाणि । अविशेषास्तन्मात्रान्तःकरणे । लिंगमात्रं बुद्धिः । अलिंगमव्यक्तमित्युक्तं । प्र

27 र्वं वगुणस्वरूपध्याय व्यक्तस्याद्वयित्वेन प्रत्यक्षज्ञानाद्दव्यपज्ञातव्यत्वं योगकाले वक्तव्यामिति पर्वाणि २७

निर्दिष्टानि एवं दृश्यत्वेन द्रष्टुरुपदिश्य प्रथमं ज्ञातव्यत्वात्तदवस्थासहितं व्याख्याय यादृश्यं द्रष्टारं

५३ व्याकर्तुमाह । द्रष्टा दृशिमात्रः शुद्धोपि प्रत्ययानुपश्यः ॥ द्रष्टा पुरुषो दृशिमात्रश्चेतनामात्रः ।

मात्रग्रहणं धर्मधर्मिनिवासार्थं केचिद्धि चेतनामात्मनो धर्ममिच्छंति । स शुद्धोपि परिणामित्वाद्य

भावेन स्वप्रतिष्ठोपि प्रत्ययानुपश्यः । प्रत्ययाविषयोपरक्तानि ज्ञानानि तान्यव्यवधानेन प्रतिसं

ष्य

ज्ञो२ चित्प्रयोजन४

क्रमाद्यस्त्रावेशस्वपशुपतिः एतदुक्तं भवति ज्ञानविषयोपरागायामेव बुद्धौ सन्निधानमात्रेणैव पुरु
षस्य द्रष्टृत्वमिति। स एव वाद्युक्तेत्याद्यातदर्थ एव दृश्यपश्यात्मा। दृश्यपश्यप्रायदृक्लक्षणपश्यपश्या
त्मा यत्स्वरूपं स तदर्थः। तस्य पुरुषस्य भोक्तृत्वप्रतिपादनं नाम स्वार्थपरिहारेण प्रयोजनं।
न हि प्रधानं प्रवर्तमानमात्मनः। किमर्थं पेक्ष्य प्रवर्तते। किं तु पुरुषस्य भोगं संपादयामीति।
यद्येवं पुरुषस्य भोगसंपादनमेव प्रयोजनं। तदानीं संपादिते तस्मिंस्तत्प्रयोजनं विरतत्वा
पारंपर्यात् तस्मिन् परिणामस्रवस्य [illegible] दृष्टत्वात् सर्वं द्रष्टारो [illegible] धराहितं सुखः। तत्स्वसंसारोच्छे
दः स्यात् सांख्यं क्वाह कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात्। यद्यपि विवेकख्याति
पर्यन्ता भोगसंपादनात् कथमपि कृतार्थं पुरुषं प्रति तत्र नष्टं विरतव्यापारमपि सर्वं पुरुष

षष्ठीसाधारणत्वादस्यात्मत्यनष्टं सर्वथापायमवति स्वातः अतः प्रधानस्य सकललोकसाधारणत्वा
न्न कदाचनापि विनाशः ॥२२॥ एकस्य मुक्तौ न सर्वेषां मुक्तिप्रसङ्ग इत्युक्तं भवति । दृश्यद्रष्टारौ व्याख्या
य संयोगं व्याख्यातुमाह ॥ स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः ॥२३॥ कार्यद्वारेणास्य लक्षणं
करोति । स्वशक्तिर्दृश्यस्वभावः स्वामिशक्तिर्द्रष्टुः स्वरूपं तयोर्द्वयोरपि संवेद्यसंवेदकत्वेन व्य
वस्थितयोर्या स्वरूपोपलब्धिस्तस्याः कारणं यः स संयोगः । स च सहजभोग्यभोक्तृत्वलाभस्व
रूपान्नान्यो नहि तयोर्नित्ययोर्व्यापकयोश्च स्वरूपादतिरिक्तः कश्चित्संयोगः । यदेव भोग्यस्य
भोग्यत्वं भोक्तुश्च भोक्तृत्वमनादिसिद्धं स एव संयोगः ॥२३॥ तस्यापि कारणमाह ॥ तस्य हेतुरविद्या ॥२४॥ या
पूर्वं विपर्यासात्मिका मोहरूपा अविद्या व्याख्याता सा तस्याविवेकख्यातिरूपस्य संयोगस्य कार २८

१५ः स्वमनागतमित्युक्तौ हेयं १

नूर २

णां हेयं हानं क्रियाकर्मेत्याह । किंतु नस्त्वज्ञानमित्याह । तदभावात्संयोगाभावो हानं तद्दृशेः कैव
ल्यं । तस्या अविद्यायाः स्वरूपविरुद्धेन सम्यग्ज्ञानेनोन्मूलितायां योयमसाववस्थितिस्तत्का
र्यस्य संयोगस्याभावः स तद्धानमित्युच्यते । अयमर्थः नितस्य मूर्तेर्द्रष्टव्यत्यरित्यागो युज्यते ।
किंतु जातायां विवेकख्यातावविवेकनिमित्तः संयोगः स्वयमेव निवर्तत इति तस्य स्वतो हानं यद
वतसंयोगस्य हानं तदेव नित्यं कैवल्यस्यापि पुरुषस्य कैवल्यं व्यवदिश्यते । तदेवं संयोगस्य
स्वरूपं । कारणं कार्यं चाभिहितं । अथ हानोपायकथनद्वारेणोपादेयकारणमाह । विवेक
ख्यातिरविप्लवा हानोपायः ॥ अन्येगुणाः अन्यः पुरुषः इति एवंविधस्य विवेकस्य याख्यातिः
प्रज्ञा सा हानस्य दृश्यपरित्यागस्योपायः कारणं । कीदृशी । अविप्लवा । न विद्यते विप्लवो विच्छेदो

उपा१

=१ प्रतिपक्षभावनाबलादविद्याप्रविलये विनिवृत्तज्ञातृत्वकर्तृत्वाभिमानायां रजस्तमोमूलनिवृत्तायां बुद्धेरंतर्मुखायां
=तरा१ यां चित्तच्छायापत्तिः ×

पात॰ तरांशं कृत्वा नष्टपोषध्यात्मविभवी। दुःखमनन्ता त्ययीमा विवेकख्यातिरित्यथ तातस्यां च सम्प्रतिर्लोके न१
२५ नप्रवृत्तायां दृश्याधिकारनिवृत्तेर्न वर्तते व किमर्थं। उत्पन्नविवेकख्यातेः पुरुषस्य या दृशी प्रज्ञा
भवति तां कथयन्नविवेकख्यातेरवस्थारूपमाहातस्य सप्तधा प्रान्तभूमिः प्रज्ञा। तस्योत्पन्नवि
२९ वेकज्ञानस्य प्रज्ञा सप्तविधा कवलरूपा प्रज्ञा प्रीतिरूपामोपकलमालंबनुभमा। तेषु प्रतिपर्यन्तं सप्तप्र
काराभवति। तत्र कार्यविमुक्तिरूपा चतुःप्रकारा। ज्ञातं मया ज्ञेयं ज्ञातव्यं किंचिदस्ति। क्षीणा देहे
मे क्लेशाः न क्षेतव्यं किंचिदस्ति। अधिगतं मया ज्ञानं प्राप्तं मया विवेकख्यातिरिति। प्रत्ययान्तर
परिहारेण तस्यामवस्थायामीदृश्येव प्रज्ञा जायते। ईदृशी प्रज्ञा कार्यविषये निर्मलं ज्ञानं
कार्यविमुक्तिरित्युच्यते। चित्तविमुक्तिस्त्रिधा। चरितार्था मे बुद्धिर्गुणाः हताधिकाराः। गिरिशिख

स्व१ नी१

रनिपतितास्वयावाणैर्निरुतंछिनियांस्यांति स्वकारणाऽज्ञानमानिरुतवानामोहाभिधानमूलकारणानामावासिनिश्च
येऽज्ञनत्वाद्यामीमांकृतः प्रारा हःशेनाल्मीभूतस्य मेममाधिंश्च स्मिन्नि स्वरूपप्रतिष्ठोहमितीदशीविश्वकारा
विन्नविप्लाक्तिः। तदेवमीदृश्यांमम विधयां तन्मूमि प्रज्ञाया दुपपद्यतायां उत्तरः कुशलः प्रज्ञता। विवेक
४ दे ३ः ख्यातिनिष्ठयोगान्नावेँदुःखफलो नश्चाफलगत्यतो किंनिमित्तामित्याह। योगांग्याव नुष्ठानामुद्धिक्षये ज्ञान २४
दीप्तिरा विवेकख्यातेः। योगांगानि वक्ष्यमाणानि। तेषामनुष्ठानात्तज्ज्ञानपूर्वकादभ्यासादा विवेकख्या
तेरशुद्धिक्षये चित्तसत्वस्य प्रकाशावरणलक्षणक्लेशात्मका शुद्धिक्षये याज्ञानदीप्तिः शिखा स्तूलेऽनुसमा
त्मिकापरिणामो विवेकख्यातिपर्यन्तः स तस्याः ख्यातेर्हेतुरित्यर्थः॥ योगांगादैतुष्ठानोप्सुद्धिक्ष
यफलकन्द्धाकानियुक्तानि योगांग्यानि तेषामुद्देशमाह। यमनियमासनप्राणायामप्रत्याहारधा

नी१

पात०

२६ ऽधारणाध्यानसमाधयोऽष्टावंगानि। इष्टकानि विविक्तसमाधेः॥ माह्यादुपकारकत्वेनांतरांगाण्यंगानि। यथा
धारणाद्यानि। कानिचित्प्रतिपक्षभूतहिंसादिवितर्कोन्मूलनद्वारेण समाधिमुपकुर्वंति। यथा यमनि
यमादयः॥ तत्रासनादीनामुत्तरोत्तरस्योपकारकत्वं। यथासति आसनजये प्राणायामस्थैर्यमेवं ३०
उत्तरत्रापि योज्यं। क्रमेणैषां स्वरूपमाह। अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः॥ तत्र हिंसा २६
प्राणवियोगप्रयोजनो व्यापारः। स च सर्वानर्थहेतुः तदभावो ऽहिंसा। हिंसायाः सर्वप्रकारेणै
व परिहार्यत्वात् प्रथमं तदभावरूपाया अहिंसाया निर्देशः॥ सत्यं वाङ्मनसयोर्यथार्थत्वं॥ स्तेयं
परस्वापहरणं। तदभावो ऽस्तेयं। ब्रह्मचर्यमुपस्थसंयमः॥ अपरिग्रहो भोगसाधनानामस्वीका
रः॥ त एते अहिंसादयः पंचयमशब्दवाच्याः॥ योगांगत्वेन निर्दिष्टाः॥ एषां विशेषमाह। ते तु जातिदेशकाल

न२ =जा॰स्त =चन२

समयानवछिन्नाः सार्वभौमा महाव्रतं। तिर्ब्राणत्वादिः देशस्तीर्थादिः कालश्चतुर्दश्यादिः समयो ब्रा
ह्मणप्रयोजनादिः। एतैश्चतुर्भिरनवछिन्ना अहिंसादयो यमाः सर्वासु क्षिप्तादिषु चित्तभूमि
षु भवा महाव्रतमित्युच्यंते। न ब्राह्मणं न हनिष्यामि। न तीर्थे कंचन हनिष्यामि। न चतुर्दश्यां न हनि
५५ ष्यामि। देवब्राह्मणप्रयोजनव्यतिरेकेण कमपि न हनिष्यामीति। एवंविधाववछेदव्यतिरेकेण क्वचि
त्क्वचित्कदाचित्कस्मिंश्चिदर्थे न हनिष्यामीत्यनवछिन्नाः। एवं सत्यादिषु यथायोगं योज्यं
। इत्थमनियतीकृताः सामान्येनैव प्रवृत्ताः महाव्रतमित्युच्यंते। न पुनः परिमितावछिन्नाः। नि
यमानाह। शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः। शौचं द्विविधं बाह्य निर२
मभ्यंतरं च। बाह्यं मृज्जलादिभिः कायादिप्रक्षालनं आभ्यंतरं मैत्र्यादिभिश्चित्तमलानां क्षालनं।

रु

पातं॰ तोषः संतुष्टिः शेषाः प्रागेव [illegible] व्याख्याताः॥ एतद्यौवाद्यो नियमग्राह्वाः॥ कथमेषां योगांगत्व-
२७ मित्याह॥ वितर्कबाधने प्रतिपक्षभावनं॥ वितर्कयंत इति वितर्का योगपरिपंथिनो हिंसादयः॥ त-
षां प्रतिपक्षभावने सति यदा बाधा भवति तदा योगः सुकरो भवति॥ इति नन्वत्येवं यमनियमानां
योगांगत्वं स्यान्मी वितर्काणां स्वरूपं भेदं प्रकारं कारणं फलं च क्रमेणाह॥ वितर्का हिंसाद- श्री ३१
यः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानानंतफ-
ला इति प्रतिपक्षभावनं॥ एत एवोक्ता हिंसादयः॥ प्रथमं त्रिधा भिद्यंते॥ कृतकारितानुमोदनभे-
देन॥ तत्र स्वयं निष्पादिताः कृताः॥ कुरु कुर्विति प्रयोजककर्तृव्यापारेण समुत्पादिताः कारिताः॥
अन्येन क्रियमाणाः साध्वित्यंगीकृताः अनुमोदिताः॥ एतच्च त्रैविध्यं परस्परव्यामोहनिवारणायोक्त-

क्रोध२

तोऽत्यर्थमंदमतिरेवं मन्यते न मया स्वयं हिंसा कृतेति तेन त्रिभेदो भवति। एतेषां कारणप्रतिपादना
याह। लोभमोहमूला इति। यद्यपि लोभः प्रथमं निर्द्दिष्टः तथापि सर्व्वक्लेशानां मोहस्यानात्मन्या
त्माभिमानलक्षणस्य निदानत्वात् तस्मिन् सत्येव स्वपरविभागपूर्वकत्वेन लोभक्रोधादीनामुद्भवान्मूल
त्वमवसेयं। मोहपूर्व्विका सर्व्वदोषजातिरित्यर्थः। लोभस्तृष्णा। क्रोधः कृत्याकृत्यविवेकोन्मूलकं प्रज्वलना
त्मकश्चित्तधर्म्मः। प्रत्येकं कृतादिभेदेन त्रिप्रकारा अपि हिंसादयो मोहादिकारणत्वेन त्रिधा भिद्यन्ते।
एषामेव पुनरवस्थाभेदेन वै वि[illegible]। मृदुमध्या विमात्रा मृदवो मन्दाः नातितीव्रा नातिमन्दा मध्याः। अधि
मात्रा[illegible]ः। इत्यात्या नव भेदाः इत्थं त्रैविध्ये सति सप्तविंशतिर्भवन्ति। मृद्वादीनामपि प्रत्येकं मृदुम
ध्याधिमात्रभेदेन त्रैविध्यं संभवति। यथायोगं योज्यं। तद्यथा मृदुमृदुः मृदुमध्यो मृदुतीव्र इति। एषां

४ज्ञाति
२ धम्मान्
२त्राः
गं
मृदु

सु२ . यथा४

पा०त० फलमाहदुःखाज्ञानानंतफलां। दुःखं प्रतिकूलतया वभासमानो राजसश्चित्तधर्मः। अज्ञानं
मिथ्याज्ञानं संशयविपर्ययादिरूपं। ते दुःखाज्ञाने अनंतमपरिच्छिन्नं फलं येषां ते तथोक्ताः।
२८ रत्वं तेषां स्वरूपकारणादिलोचनं ज्ञानानां प्रतिपक्षभावनया योगिना परिहारः कर्त्तव्य इत्यर्थः। इष्टफ
पदिष्टं भवति। एषामभ्यासात्मकफलं गच्छतामनुनिष्पादितैः सिद्धयो भवंति। तथा क्रमेण प्रतिपाद ३२०
यितुमाह। तत्सन्निधौ वैरत्यागः॥ तस्याहिंसां वावयतः सन्निधौ सहजविरोधिनामप्यहीनकु
३२ लादीनां वैरत्यागो निर्मत्सरतयावस्थानं भवति। हिंसत्वं परित्यजंतीत्यर्थः॥ सत्याभ्यासवतः॥
किं भवतीत्याह। क्रियाफलाश्रयत्वं। क्रियमाणा हि क्रिया यागादिकाः फलं स्वर्गादिकं प्रयच्छंति। अस्य तु
सत्याभ्यासवतो योगिनस्तथा सत्यं प्रकृष्यते। यथा कृतायामपि क्रियायां योगी फलमाश्रयति। तद्वचनात् नातूय

हिंसारत्ना१ गा१२

= चिर = हृ ब्रह्मचर्यजनितश्चायांरे = अस्तेयेसर्व

स्यकस्य क्रियामकुर्वतोऽपि फलं भवतीत्यर्थः । अस्तेयमि स्थिर्मेवतः । फलमाह । रत्नोपस्थानं । अस्तेयं

ददात्यस्येति योगीनद्दाद्यौ तस्यातिकर्षात् निरभिलाषस्यापि सर्वतो दिक्कानि रत्नान्युपतिष्ठंति । ब्रह्म

चर्यप्रतिष्ठायाः फलमाह वीर्यलाभः । यः किल ब्रह्मचर्यमभ्यस्यति तस्य तत्प्रकर्षात् निरतिशयं वीर्यं

सामर्थ्यमाविर्भवति । वीर्यनिरोधो हि ब्रह्मचर्यं तस्य प्रकर्षात् शरीरेन्द्रियमनःसु वीर्यं प्रकर्षमा नु २१४

= अपरिग्रहस्थैर्ये ५ गच्छति । अपरिग्रहस्य फलमाह । जन्मकथंतासंबोधः । कथमित्यस्य भावः कथंता जन्म

नः कथंता जन्मकथंता । तस्याः संबोधः सम्यग्ज्ञानं जन्मान्तरे कोऽहमासं कीदृशः किंकार्यकारी

ति जिज्ञासायां सर्वमेव सम्यग्जानातीत्यर्थः । न केवलं भोगसाधनपरिग्रह एव परिग्रहः यावदा

त्मनः शरीरपरिग्रहोऽपि परिग्रहः । भोगसाधनत्वाच्छरीरस्य । तस्मिन्सति रागानुबंधाद्बहिर्मुखा = ब

स्प२

पात॰ २९ यामेवमस्यस्थैर्येतन्मात्विकज्ञानप्रादुर्भावः ३८ । यदासुनः शरीरादिपरिग्रहन्नैरपेक्ष्येणमाध्यस्थमव
लंबते तदास्मोर्धाभ्यासैराग्यादित्यागात्सम्यक्ज्ञानं हेतुर्भवत्येवं पूर्वापरजन्मसंबोधः ३९ । उक्ताय
मानानां सिद्धयः । नियमानाह । शौचात्स्वांगजुगुप्सा परैरसंसर्गः ४० । शौचविलावयति । तस्य स्वांगेष्वपि
कारणस्वरूपपर्यालोचनाद्वारा जुगुप्सा घृणा समुपजायते । अशुचिरयं कायो नात्राग्रहः क ३२९
र्त्तव्य इति । अमुनैव हेतुना परैरन्यैः स्वकायवद्भिरसंसर्गः ४० । संपर्कोसावः । परिवर्जनमित्यर्थः । यः
किल स्वमेव कायं जुगुप्सते तत्सवद्यदर्शनात्मकथं परकायैस्तथाभूतैः कायैः संसर्गमनुभव
ति । शौचस्यैव फलांतरमाह । द्विविधस्यापि शौचस्य बाह्याभ्यन्तरस्य येन फलं । सत्वशुद्धिसौमनस्यैकाग्र्यें
द्रियजयात्मदर्शनयोग्यत्वानि भवंतीति वाक्यशेषः । सत्वं प्रकाशसुखाद्यात्मकं तस्य शुद्धिः

घा१

जम्बमोध्यामतन्निनवश्मे मनस्थैखेदाननुभवेन मानसी प्रीतिः। एकाग्रता नियतृति विषये चेतसः स्थैर्यं इं
द्रियजयो विषयपराङ्मुखानामिंद्रियाणामात्मन्यवस्थानं। आत्मदर्शने विवेकख्याति स्तत्र च योग्य
२ समर्थत्वं यत्वं। शौचाभ्यासवत एतत्सत्त्वशुद्ध्यादयः क्रमेण प्रादुर्भवंति। यथा हि सत्त्वशुद्धिः सत्त्वशुद्धेः सौमन
स्यं। सौमनस्यादैकाग्र्यं। ऐकाग्र्यादिंद्रियजयः। इंद्रियजयादात्मदर्शनयोग्यतेति। संतोषाभ्यासस्य
फलमाह। संतोषादनुत्तमः सुखलाभः। संतोषप्रकर्षेण योगिनस्तथाविधमांतरं सुखमाविर्भवति य
श१६ स्य बाह्यं इंद्रियसुखं शतांशेनापि न समम्। तपसः फलमाह। कायेंद्रियसिद्धिरशुद्धिक्षयात्तपसः। सम तपः
भ्यस्यमानं तपः क्लेशादिलक्षणमशुद्धिक्षयद्वारेण कायेंद्रियाणां सिद्धिमुत्कर्षमादधाति॥
कायस्य यथेच्छमणुत्वमहत्त्वादीनि। स्वाध्यायस्य फलमाह। स्वाध्यायादिष्टदेवतासंप्रयोगः। अभिप्रेत
१: अयमर्थः। चांद्रायणादिना चित्तक्लेशक्षयः। ततः इंद्रियादीनां सूक्ष्मव्यवहितविप्रकृष्टदर्शनादि
सामर्थ्यमाविर्भवति।

त्प४ चा२

पातंज तमंत्रजपादिलक्षणोध्याध्यायेप्रकृष्यमाणोयोगिनइष्टयाभिप्रेतयादेवतयासंप्रयोगोभवति।सदि
३० वताप्रत्यक्षाभवतीत्यर्थः४४।ईश्वरप्रणिधानस्यफलमाह।समाधिसिद्धिरीश्वरप्रणिधानात्॥
२ध्ये ईश्वरस्यप्रणिधानाद्भक्तिविशेषात्तस्मात्समाधेःफलज्ञानात्सर्वविघ्नान्निवालयति।यस्मात्सभगवानीश्वरः
प्रसन्नस्सन्नंतरायरूपान्क्लेशान्परिहृत्यसमाधिमुद्बोधयति।यमनियमानुक्त्वासनमाह।स्थि ३४
रसुखमासनं४आस्यतेऽनेनेत्यासनं।पद्मासनदंडासनस्वस्तिकादि।तद्यदास्थिरंनिष्कंपंसु
२गी खमनुद्वेजनीयंभवतितदातद्योगांगतांभजते।तच्चैवस्थिरसुखमवाप्त्यर्थमुपायमाह।प्रयत्नशैथि चा२
ल्यानंतसमापत्तिभ्यां।तदासनंप्रयत्नशैथिल्येनानंतसमापत्त्यास्थिरंसुखंचभवतीतिसंबंधः४७॥
यदायदासनंबध्नामीतिप्रयत्नश्चशैथिल्येप्रकोशानेवतदासनंनिष्पद्यते।यथा वाकाशादिगते

दा१

रयद्याऽनंतेनागनायके स्थिरतरफणासहस्रविधृतविश्वंभरामंडले समापन्नं चित्तमासनं निर्वर्तयतीति

श्चार

द्यानंतेषे चेतसः समापत्तिः क्रियतेऽवधानेन तादात्म्यमापद्यते। तदा देहाहंकाराभावान्नासनं दुःखज
नकं भवति॥ अस्मिंश्चासनजये सति प्राणायामाद्यंतरायभूता न प्रभवंतीति॥ अंगमेजयत्वादयः॥ येषां द्वंद्वनिव्या
दित्सोः फलमाह॥ ततो द्वंद्वानभिघातः॥ तस्मिन्नासनजये सति द्वंद्वैः शीतोष्णादिभिर्योगी नाभि
हन्यत इत्यर्थः॥ आसनजयानंतरं प्राणायाममाह॥ तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणाया
मः॥ आसनस्थैर्ये सति तन्निमित्तकः प्राणायामलक्षणो योगांगविशेषोऽनुष्ठेयो भवति॥ कीदृशः॥
श्वासप्रश्वासयोर्गतिविच्छेदलक्षणः॥ श्वासप्रश्वासौ निरुक्तलक्षणौ तयोस्त्रिधा रेचनपूरण
कुंभकेन बाह्याभ्यंतरेषु स्थानेषु गतेः प्रवाहस्य विच्छेदो धारणं प्राणायाम उच्यते॥ तस्यैव सु
खावगमाय विभज्य स्वरूपं कथयति॥ स तु बाह्याभ्यंतरस्तंभवृत्तिः देशकालसंख्याभिः परिदृ

=३१ दीर्घसूक्ष्मः देशोऽवधिर्दिशेनोपलक्षितो यथा नासाद्वादशान्तादौ कालेनोपलक्षितो यथा षट्त्रिंशन्मा
त्रादिप्रमाणः संख्ययोपलक्षितो यथा

पा०सं० ष्टो दीर्घसूक्ष्मः ॥ बाह्यवृत्तिः श्वासो रेचकः अन्तर्वृत्तिः प्रश्वासः पूरकः अन्तःस्तम्भवृत्तिः कुम्भकः
३१ नास्मिञ्जलमिव कुम्भे निश्चलतया प्राणोऽवस्थाप्यत इति कुम्भकः । त्रिविधोऽयं प्राणायामो देशेन
३ पा कालेन संख्ययोपलक्षितो [redacted] यथाऽयाता वारा एतावद्भिः श्वासप्रश्वासैः प्रथम उ
द्घातो भवतीत्येतज्ज्ञानाय संख्योपलक्षणं तुपादानं उद्घातो नाम नाभिमूलात्प्रेरितस्य वायोः शिर
स्यभिहननं तेनेह निधायप्राणायामानां वस्तु थमनि धाउमा हा बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः ३५
३५ प्राणायामस्य बाह्यो विषयो द्वादशान्तादिः आन्तरो विषयो हृदयनाभिचक्रादिः ॥ तौ द्वौ वि
द्विषम२ षयावपर्यालोच्यैव सहसा तथोपनिपतितज्जलन्यायेन युगपत्स्तम्भवृत्त्या निष्पाद्यते । अस्थ
तु विषयद्वयाक्षेपकोऽनिरोधः । अयमपि पूर्ववद्देशकालसंख्याभिरुपलक्षितो द्रष्टव्यश्चतु
=२लोच्यः यः तान्रूपो गतिके दः स चतुर्थः प्राणायामः । इतीयम्मात् कुम्भकाख्यात् अयमस्य विशेषः
स बाह्याभ्यन्तरौ विषयावपर्या=

विषयस्याप्यभ्यासफलमाह ततः क्षीयते प्रकाशावरणं। ततस्तस्मात्प्राणायामात्प्रकाशस्य चित्तसत्वग-
तस्य यदावरणं क्लेशरूपं तत्क्षीयते विनश्यतीत्यर्थः॥ फलांतरमाह धारणासु च योग्यता मनसः।
धारणा वक्ष्यमाणलक्षणाः॥ तासु प्राणायामैः क्षीणदोषं मनः॥ यत्र यत्र धार्यते तत्र तत्र स्थिरीभवति।
न विक्षेपं भजते। प्रत्याहारस्य लक्षणमाह स्वविषयासंप्रयोगे चित्तस्वरूपानुकार इवेंद्रियाणां प्रत्याहा-
रः॥ इंद्रियाणि विषयेभ्यः प्रतीपमाह्रियंते ऽस्मिन्निति प्रत्याहारः स च कथमिति॥ पद्यत इत्याह चक्षुरादी-
नामिंद्रियाणां स्वो विषयो रूपादिस्तेन संप्रयोगाभावस्तदाभिमुख्येन वर्तनं तदभावस्तदाभिमुख्यं परित्य-
२ स्व ज्य स्वरूपमात्रावस्थानं। तस्मिन् सति चित्तमात्रानुकारीणींद्रियाणि भवंति। ततश्चित्तमनुवर्तमानानि म-
धुकरराजमिव मक्षिकाः। सर्वाणींद्रियाणि प्रतीयंते। अतश्चित्तनिरोधे तानि प्रत्याहृतानि भवंतीति। तेषां

नि०

पा॰ २ तत्स्वरूपानुकारः ५४। प्रत्याहारमुक्त्वा फलमस्याह। ततः परमा वश्यतेंद्रियाणां ५५। अस्मिन्नभ्यस्यमाने हि प्रत्याहा
३२ रे तथा वश्यान्यायत्तानीन्द्रियाणि संपद्यन्ते। यथा बाह्यविषयाभिमुखतां नीयमानान्यपि न यान्तीत्यर्थः ॥
तदेवं प्रथमपादोक्तलक्षणस्य योगस्यांगभूतक्लेशतनूकरणफलं क्रियायोगमभिधाय क्लेशान
मुद्देशं स्वरूपं कारणं फलं चोक्त्वा कर्म्मणामपि भेदं कारणं स्वरूपं फलं चाभिधाय विपाकस्य स्वरूपं ३९
फलं चाभिधाय विपाकस्य स्वरूपं कारणं चाभिहितं। ततस्त्याज्यत्वात् क्लेशादीनां ज्ञानव्यतिरेकेण
त्यागस्याशक्यत्वात् ज्ञानस्य च शास्त्रायत्तत्वात् शास्त्रस्य हेयहेयकारणोपादेयोपादानकारणबोधकत्वेन चतु
र्व्यूहत्वात् हेयस्य च हानव्यतिरेकेण स्वरूपानिष्पत्तेः हानसहितं चतुर्व्यूहं स्वकारणसहितमभि
अभिधायोपादेयकारणभूताया विवेकख्यातेः कारणभूतानामंतरंगबहिरंगभावेन स्थितानां यो

=सहितं

गांगानांयमादीनांस्वरूपंफलसहितंव्याहृत्यधारणापर्यंतानांचासनादीनांपरस्परमुपकार्यो
पकारकत्वेनस्थितानामुद्देशमभिधायप्रत्येकं[illegible]लक्षणंप्रदर्श्यकंफलमभिहितं।। एवं
योगांगयमनियमादिनि४प्रासबीजभावेनासनप्राणायामैरंकुरितं४प्रत्याहारेणपुष्पि
तोधारणाध्यानसमाधिभिः४फलिष्यतीतिव्याख्यातःसाधनःपादः।। २।। इतिमहाराजाधिरा
जश्रीभोजदेवविरचितायांराजमार्तंडाभिधायांपातंजलयोगशास्त्रसूत्रवृत्तौ द्वितीयःसाधन
:पादः२।। ।।यत्पादपद्मस्मरणादणिमादिविभूतयः४जयंतितंविनामस्कृत्यभूतनाथं४प्रभूतये।
तदेवमुक्तोद्दिष्टंधारणाद्यंगत्रयंनिर्णेतुंसंयमसंज्ञाविधानपूर्वंबाह्याभ्यंतरादिसिद्धिप्रति
पादनायलक्षणंकर्तुमुपक्रमते। तत्रधारणायाःस्वरूपमाह। देशबंधश्चित्तस्यधारणा।
दशेनाभिचक्रेनासाग्रादौचित्तस्यबंधःविषयांतरपरिहारेणस्थिरीकरणंसाचित्तस्यधारणे

चित्तपारि१ ध्येर ना१

पात ममकथोमौ कथ्यते। अयमर्थमित्र्या दिमि[illegible] कर्मत्वा मिन्नांतःकरणे नयमनियमवतो जितमनेन
33 परिहृतप्राणविक्षेपेण प्रत्याहृतेंद्रियग्रामेण निर्बाधे प्रदेशे ऋजुकायेन जितद्वंद्वेन यो
गिना नासाग्रादौ संप्रज्ञातस्य समाधेरभ्यासाय वेतसः स्थिरीकरणं कर्तव्यमिति। धारणामभिधा
४भाजि यध्यानं धातुमाह। तत्र प्रत्ययैकतानता ध्यानं। तत्र तस्मिन्देशे यत्र चित्तं धृतं तत्र प्रत्ययस्य ज्ञानस्य
या एकतानता विसदृशपरिणामपरिहारद्वारेण यदेव धारणायामालंबनीकृतं तदालंबनतयै
37 व निरंतरमुत्पत्तिः सा ध्यानमित्युच्यते। चरमं योगांगं समाधिमाह। तदेवार्थमात्रनिर्भासं स्वरूप
शून्यमिव समाधिः। तदेवोक्तलक्षणं ध्यानं यत्रार्थमात्रनिर्भासमर्थाकारसमावेशाद्भूतार्थस्व
रूपत्वात् ज्ञानस्वरूपेण शून्यतामिवापद्यते। स समाधिरित्युच्यते। सम्यगाधीयते एकाग्रीक्रि

स्वरूपत्वेन१ थार २ ध२

=२ त्रयमेकत्र संयमः। एकस्मिन्विषये ध्यानधारणासमाधित्रयं प्रवर्तमानं संयमसंज्ञया शास्त्रे व्यव
क्रियते। तस्य फलमाह। =२
यतो विद्वेषात्परिहृत्य यत्नम् न ॰ स समाधि॰। उक्तलक्षणस्य योगाङ्गत्रयस्य व्यवहारयता विकीर्संज्ञां क
र्तुमाह। तज्जयात्प्रज्ञालोकः। तस्य संयमस्य जयादभ्यासेन सात्म्योत्पादनात्। प्रज्ञायाः ज्ञानस्य विवेकख्य
ड़२ पाया आलोकः प्रसरो भवति प्रज्ञा ज्ञेयं सम्यगवभासयतीत्यर्थः। तस्योपयोगमाह। तस्य भूमिषु वि
नियोगः। तस्य संयमस्य भूमिषु स्थूलसूक्ष्मालम्बनभेदेन स्थितासु चित्तवृत्तिषु विनियोगः कर्तव्यः
अधरामधरां चित्तभूमिं जितां जितां ज्ञात्वोत्तरस्यामुत्तरस्यां चित्तभूमौ संयमः कार्यः। न ह्यधरा ली
कृताधरभूमिकस्योत्तरस्यां भूमौ संयमं कुर्वाणः फलं लभत इति। साधनपादे योगाङ्गान्यष्टावुद्दिश्य हि ६
पञ्चानां लक्षणं विधाय त्रयाणां कथं न कृतमित्याशङ्क्याह। त्रयमन्तरङ्गं पूर्वेभ्यः। पूर्वेभ्यो यमादि
भ्यो योगाङ्गेभ्यः पारम्पर्येण समाधेरुपकारकेभ्यो धारणादियोगाङ्गत्रयं संप्रज्ञातस्य समाधेरन्तरङ्गं

व्युत्थानसंस्कृतमूढविक्षिप्ताख्यं भूमित्रयी। निरोधः प्रकृष्टसत्त्वस्यांगितया चेतसः परिणामः।५

पातं० समाधिस्वरूपनिष्पादकत्वात्तत्सापि समाधेरन्तरापेक्षया बहिरंगत्वमाह तदपि बहिरंगं निर्बीजस्य

३४ निर्बीजस्य निरालंबनस्य शून्यभावनापरपर्यायस्य समाधेरेतद् पियोगांगत्रयं बहिरंगं। पारंपर्ये

णोपकारकत्वात् इदानीं योगसिद्धिमाख्यातुकामः संयमस्य विषयपरिशुद्धिं कर्तुं क्रमेण परिणा

38 मत्रयमाह व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरि ३८

णामः ॥ तस्य व्युत्थाननिरोधाख्यायोजनितौ संस्कारौ तयोर्यथाक्रममभिभवप्रादुर्भावौ अ

सू०९ भिभवो न्यक्कृतत्वात्कार्यकरणासामर्थ्येनावस्थानं प्रादुर्भावो वर्तमानेध्वन्यभिव्यक्तरूपतया

। निरोधक्षणे चित्तस्योभयक्षणवृत्तित्वादन्वयो यः स निरोधपरिणाम उच्यते। अयमर्थ

॥ यदा व्युत्थानसंस्काररूपो धर्मस्तिरोभूतो भवति निरोधसंस्काररूप आविर्भवति धर्मिरूप

रू

=६ धर्मः। एकस्मिन्नेवालंबने सदृशपरिणामिता एकाग्रता सापि चित्तस्य धर्मः॥ तयोर्यथाक्रमं क्षयोदयौ सर्वार्थताया लक्षणाय
धर्मस्य ह्रयो+

त्वेर

तथा च चित्तस्य यत्राद्यपि त्वेनानवस्थितं प्रतीयते तदा निरोधपरिणामश्चाद्येनैव क्रियते।
चलत्वाद्गुणवृत्तस्य यद्यपि चित्तमो निश्चलं नास्ति तथाप्येवंभूतत्वं परिणामः स्थैर्यमुच्यते तस्य
स्यैव फलमाह। तस्य प्रशांतवाहिता संस्कारात्॥ तस्य चित्तस्य उक्तान्निरोधसंस्कारात् प्रशां
तवाहिता भवति परिहृतविक्षेपतया सदृशप्रवाहपरिणामि चित्तं भवतीत्यर्थः॥ निरोध
परिणाममभिधाय समाधिपरिणाममाह। सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधि
परिणामः॥ सर्वार्थता चलत्वान्नानाविधार्थग्रहणं चित्तस्य धर्मः। एकाग्रताल
क्षणश्च धर्मश्चित्तस्य प्रादुर्भावो तिरोभावश्चित्तस्योद्रिक्तं सर्वस्यापि तोद्भव स्यानं समाधिप यार
रिणाम इत्युच्यते। पूर्वस्मात्परिणामादस्यायं विशेषः। तत्र संस्कारलक्षणयोर्धर्मयोस्तिर

स्त्राविर

पां॰ नं॰ ३५ वस्युदुर्भावो। पूर्वस्य स्वलक्षणसंस्कारस्य स्वधर्मिण्यास्थानं॥ उत्तरस्य निरोधसंस्कारस्य प्रादुर्भा
वेणान्वितभूतत्वेनावस्थानं॥ इह तु द्वयोर्व्याधितिसर्वार्थतामपगम्य विक्षेपश्चात्यंततिरस्कारादद
नुत्पत्तिरतीतेऽध्वनि प्रवेशः क्षयः॥ एकाग्रतालक्षणस्य धर्मस्योद्भवो वर्तमानेऽध्वनि प्रकटत्वमित
३१ तीयसमाधिपरिणामः॥ शांतोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः॥ समाहि ३१
तस्यैव चित्तस्य एकः प्रत्ययो वृत्तिविशेषः शांतोऽतीतमध्वानं प्रविष्टः। अपरश्चोदितो वर्तमा सू॰ ५
नेऽध्वनि स्फुरितः। द्वावपि समाहितचित्तत्वेन तुल्यौ। एकरूपालंबनत्वेन सदृशौ प्रत्ययौ उभय
त्रापि समाहितस्यैव चित्तस्यान्वयित्वेनावस्थानं स समाधिः॥ एकाग्रतापरिणाम इत्यु
च्यते॥ चित्तपरिणामोक्तं रूपमन्यत्रातिदिशन्नाह॥ एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरि

णामा व्याख्याताः। एतेन त्रिविधोक्तेन चित्तपरिणामेन भूतेषु स्थूलसूक्ष्मेषु इंद्रियेषु बुद्धिकर्मेषु तत्कर
णेषु भेदेनावस्थितेषु धर्मलक्षणावस्थालक्षणेन त्रिविधं परिणामो व्याख्यातो वेदितव्यः। अवस्थितस्य
धर्मिणः पूर्वधर्मनिवृत्तौ धर्मान्तरापत्तिः परिणामः। मृल्लक्षणस्य धर्मिणः पिंडरूपधर्मपरित्या
गेन घटरूपधर्मस्वीकारो धर्मपरिणाम इत्युच्यते। लक्षणपरिणामो य
था। तस्यैव घटस्यानागताध्वपरित्यागेन वर्तमानाध्वाकारस्य परित्यागेन वानागताध्वपरिग्र
हः। अवस्थापरिणामो यथा। तस्यैव घटस्य ... प्रथमद्वितीययोः सदृशयोः क्षणयोरन्वयित्वे सदृशयोः
नं यतनस्य ... परिणामः ... नवको यो धर्मी ... धर्मिणो लक्ष
णमात्राणां ... अपदेश्यधर्मानुपाती धर्मी ... अपारं ... धर्म

=६ सामान्यात्मना धर्मिरूपतया ४

पात्र प्रविष्टाश्च उदिता ये अनागतमध्वानं परित्यज्य प्रत्युत्पन्नं व्यापारं कुर्वन्ति । अव्यपदेश्या ये शक्तिरूपेणास्थि
३६ ता व्यपदेष्टुं न शक्यन्ते । यथा सर्वं सर्वात्मकमित्येवमादयः । नियतकार्यकारणरूपयायोग्यतया
वच्छिन्ना शक्तिरेवेह धर्मशब्देनाभिधीयते । तं त्रिविधमपि धर्मं यो ऽनुपतति अनुवर्तते । अन्वयित्वे
न स्वीकरोति । स शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी उच्यते । यथा सुवर्णं रुचकरूपधर्म ३९
परित्यागेन स्वस्तिकरूपधर्मान्तरपरिग्रहे सुवर्णरूपतया [illegible] समानीतेषु धर्मेषु कथंचिद्भेदे ४०
स्वधर्मिरूपतया विशेषात्मनाछिन्नमन्वयायित्वेनावनामनता । एकस्य धर्मिणः कथं धर्मान्त
के परिणामा इत्याशंकामपनेतुमाह । क्रमान्यत्वं परिणामान्यत्वे हेतुः । धर्माणां स्वक्रम
लक्षणानां यः क्रमस्तस्य यत्नमितिकारणमन्यत्वं परिदृश्यमानं परिणामस्यान्यत्वं ज्ञापयति

क्रमः२ मृ१

त्वेनानाविधत्वे हेतुर्लिङ्गं ज्ञापकं भवति। अयमर्थः। योयं नियतः क्रमो मृच्चूर्णान्मृत्पिण्डस्ततः क
पालानि तेभ्यश्च घट इत्येवंरूपः परिदृश्यमानः परिणामस्यान्यत्वमावेदयति। तस्मिन्नेव
धर्मिणि यो लक्षणपरिणामस्यावस्थापरिणामस्य च क्रमः सोप्यनेनैव न्यायेन परिणामान्य
त्वे गमको भवति। सर्वएव भावा नियतेनैव क्रमेण प्रतिक्षणं परिणममानाः प
रिदृश्यन्ते। ततः सिद्धं क्रमान्यत्वात्परिणामान्यत्वम्। सर्वेषां च विचित्रादीनां परिणाममनुमानी
केचिद्धर्माः प्रत्यक्षेणोपलभ्यन्ते। यथा सुखादयः संस्थानादयश्च। केचिदेकान्तेनानुमा ततोऽत्र
नगम्याः। यथा कर्मसंस्कारशक्तिप्रभृतयः। धर्मिणश्च भिन्नाभिन्नरूपतया सर्वत्रानुगमः।
इदानीमुक्तस्य संयमस्य विषयप्रदर्शनद्वारेण सिद्धीः प्रतिपादयितुमाह। प

त्र२

पा॰तं॰ रिणामत्रयसंयमादतीतानागतज्ञानं। धर्मलक्षणावस्थाभेदेनपरिणामत्रयमुक्तंतत्रसंय
३७ माभ्यासेविशेषपूर्वोक्तस्यसंयमस्यकरणादतीतानागतज्ञानंयोगिनःसमाधेर्भवति। ६
इदमत्रतात्पर्यंअस्मिन्धर्मिणिअयंधर्मइदंलक्षणमियमवस्थाचानागताध्वनःसमागत्य
वर्त्तमानेऽध्वनिस्वव्यापारंविधायातीतमध्वानंप्रविशतीत्येवंपरिहृतविक्षेपतयायदासंयम
करोति। तियमवलाक्षणं दतिक्रांतंअनुत्पन्नंतत्सर्वंयोगीजानाति। एतत्खिन्नस्य[illegible]मविक्षे
~~दिविविदितोपिसमस्यपदाउलेहेकपायविक्षेपापायस्थहृद्यानिवृत्तनमपे। वादर्शक~~
~~थ्यस्वर्वार्थग्रहणसामर्थ्यं~~ शब्दस्यप्रकाशत्वात्सर्वार्थग्रहणसामर्थ्यमेकाग्रतावला
दाविर्भवति। सिद्धांतरमाह। शब्दार्थप्रत्ययानामितरेतराध्यासात्संकरस्तत्प्रविभागसं
मविद्यादिति। वृत्तिरूपेणपाठ्यते। यथार्थपीदाकु तैस्तैरूपायैर्विक्षेपाः परिक्षीयंते तदानिवृत्तमलस्यादर्शस्येवसर्वार्थग्रहणसामर्थ्यं२

:रुता

यमात्मर्वेश्वत[illegible]ज्ञानं शब्दः ४ श्रोत्रेन्द्रियग्राह्यो नियतक्रमवर्णात्मा नियतैकार्थप्रतीत्यवच्छिन्न
४। यदि वा क्रमरहितः स्फोटात्मा ४ अनिसंहृतग्राह्यः। उभयथापि पदरूपो वाक्यरूपश्चेति तयो
रेवार्थप्रतिपत्तौ सामर्थ्यात्। अर्थो जातिगुणक्रियादि ४ प्रत्ययो ज्ञानं विषयाकारानुविद्धा
त्ति ४। एषां शब्दार्थज्ञानानां व्यवहार इतरेतराध्यासाद्भिन्नानामपि बुद्ध्यैकरूपतापादना
त्संकीर्णश्च। तथाहि गामानयेत्युक्ते श्रवणाद्बुद्धौ लक्षणमर्थं गोत्वजात्यवच्छिन्नं सास्नादिम
त्पिंडरूपं शब्दं च तद्वाचकं ज्ञानं च तद्ग्राहकमलिकं तेनाध्यवस्यति। न च शब्दो ग्राह्यो ग्राहोवा
चकः। यतो शब्दवाच्ययोरिदं ग्राहकं ज्ञानमिति भेदेन व्यवहरति। तथाहि कोयं शब्दः
कोयमर्थः किमिदं ज्ञानमिति पृष्टः सर्वत्रैकरूपमेवोत्तरं ददाति गौरिति। सर्वथैकरूपतां न

पातं॰ प्रतिपद्यते। कथमिति कर्हप्रत्युत्तरं प्रयच्छति। एतस्मिन्नपि तेयोध्यं प्रविलापः। इदं शास्त्रमूह्यतन्त्वांयद्वाच
३८ कत्वं नाम इदं सर्वं शब्दार्थं यद्वाच्यत्वं। इदं ज्ञानं शब्दप्रत्ययकारणं त्वमिति प्रविभागं विधाय तस्मिन् प्रविभा
गे यः संयमं करोति। तस्य सर्वेषां भूतानां मृगपशुपक्षिसरीसृपादीनां यद्रुतं यः शब्दस्तत्र ज्ञान ४५
मुत्पद्यते। अनेनालिङ्गेन योगिनायं ज्ञाप्यते। शब्दस्मृत्वा इति तदिति सर्वज्ञानानीति सिद्धं तत्र सं ४२
42 हा संस्कारसाक्षात्करणात्पूर्वजातिज्ञानं। द्विविधा ह्यमी संस्कारा वासनारूपाः। संस्काराः केचित्
स्मृतिमात्रोत्पादनफलाः। केचिज्जात्यायुर्भोगविपाकलक्षणहेतवः। यथा धर्माधर्मौ। तेषु रघ्या॥
संस्कारेषु यदा संयमं करोति एवमयमर्थोऽनुभूतः। एवं मया सा क्रिया निष्पादितेति पूर्ववृ
त्तमेव संस्कारानासेवनायेव बोधमन्तरेण ज्ञायते तं तु संस्कारं सर्वमतीतं स्मरति। क्रमेण मा

पै॰१ कृ॰१

सौक्ष्मात्कृतेष्वुद्बुद्धेषु संस्कारेषु पूर्वजन्मानुभूतानपि जात्यादीन्प्रत्यक्षेण पश्यति। सिद्ध्यंतरमाह। प्रत्ययस्य
परचित्तज्ञानं। प्रत्ययस्य परचित्तस्य केनचिन्मुखरागादिना लिंगेन गृहीतस्य यदा संयमं करोति तदा परकीय
स्य चित्तस्य ज्ञानमुत्पद्यते। सरागमस्य चित्तं वीतरागं वेति। परचित्तगतानेव धर्माञ्जानातीत्यर्थः। अस्यैव परचि
त्तज्ञानस्य विशेषमाह। न च तत्सालंबनं तस्याविषयीभूतत्वात्। तस्य परस्य यच्चित्तं तत्सालंबनं स्वकीयालंबनेन स
हितं न शक्यते ज्ञातुमालंबनस्य केनचिल्लिंगेनाविषयीकृतत्वात्। लिंगाच्चित्तमात्रं परस्यावगतं। न तु नीलविष
यमस्य चित्तं पीतविषयमिति वा। यच्च न गृहीतं तत्र संयमस्य कर्तुमशक्यत्वात्। न भवति परचित्तस्य यो विषयस्तत्र
ज्ञानं। तस्मात्परकीयचित्तं नालंबनसहितं गृह्यते तस्यालंबनस्यागृहीतत्वात्। चित्तधर्माः पुनर्गृह्यंत एव यदा तु कि

पा०त०
३८
43

मनेनालीवितमितिप्रणिधानंकरोति।तदातत्संयमाद्द्विविधमपिज्ञानमुत्पद्यत एव॥सिध्यंतरमाह॥कायरूपसं
यमात्तद्ग्राह्यशक्तिस्तंभेचक्षुःप्रकाशासंयोगेंतर्धानम्॥ ॥कायःशरीरंतस्यरूपंचक्षुर्ग्राह्योगुणस्तस्मिन्रूपम
स्मिन्कायेरूपमितिसंयमाद्रूपस्यचक्षुर्ग्राह्यत्वरूपायाशक्तेःस्तंभेभावनावशात्प्रतिबंधेचक्षुःप्र
काशासंयोगेचक्षुषःप्रकाशःसत्वधर्मस्तस्यासंयोगेतद्ग्रहणव्यापाराभावेयोगिनोंतर्धानंभवति।नकेनवि
दसौदृश्यतइत्यर्थः॥ ॥एतेनशब्दाद्यंतर्धानमुक्तम्॥ ॥एतेनैवरूपाद्यंतर्धानोपायप्रदर्शनेनशब्दादीनांश्रोत्रा
दिग्राह्याणामंतर्धानमुक्तंवेदितव्यं॥सिध्यंतरमाह॥सोपक्रमंनिरुपक्रमंचकर्मसंयमादपरांतज्ञानमरिष्टेभ्यो
वा॥आयुर्विपाकंयत्पूर्वकृतंकर्मतद्द्विप्रकारं।सोपक्रमंनिरुपक्रमंच।तत्रसोपक्रमंयत्फलजननायसहोप ४२

ततर

नु २

२ किं किंमस्यकर्मशीघ्रविपाकंकिंकिंचचिरविपाकमिति

क्रमेणकार्यकरणात्तिसुखेनवर्त्तते।यथोष्णप्रदेशेप्रसारितमार्द्रवस्त्रंशीघ्रमेवशुष्यति।उक्तस्वरूपविपरीतंनि
रुपक्रमंयथा।तदेवार्द्रवासःसंवर्त्तितम्‸ष्णप्रदेशेचिरेणशोषमेति।तस्माद्द्विविधेकर्माणि।यःसंयमंकरोति
अवधानदार्ढ्यात्तदपरान्तज्ञानमस्योत्पद्यते।अपरान्तःशरीरवियोगः।तस्मिन्ज्ञानममुष्मिन्कालेऽमुष्मिन्दे
शेममभविष्यतीतिनिःसंशयंजानाति।अरिष्टेभ्योवा।अरिष्टानित्रिविधानि।आध्यात्मिकाधिभौतिकाधिदै।
विकभेदेन।तत्राध्यात्मिकानिपिहितकर्णःकौष्ठ्यवायोर्घोषंनशृणोतिइत्येवमादीनि।आधिभौतिकान्यक
स्माद्विकृ रूपदर्शनादीनि।आधिदैविकान्यकाण्डएवद्रष्टुमशक्यस्वर्गादिपदार्थदर्शनादीनि।तेभ्यःशरीर

उपेक्षायां भावनानास्ति। अतस्तस्यां न समाधिरिति

ग़ि२

पात० वियोगकालं जानाति। यद्यप्ययोगिनामप्यरिष्टेभ्यः प्रायेणाज्ञानमुत्पद्यते। तथापि तेषां सामान्याकारेण तत्सं

३९ शयं योगिनां पुनर्नियतकालदेशतया प्रत्यक्षवदव्यभिचारि। परिकर्मनिष्पादितास्ताः सिद्धीः प्रतिपादयितु

२बु माह। मैत्र्यादिषु बलानि। मैत्रीकरुणामुदितासु यो विहितसंयमस्तस्य बलानि। तासां मैत्र्यादीनां संबंधीनि

प्रादुर्भवंति मैत्रीकरुणामुदितास्तथास्य प्रकर्षं गच्छंति। यथा सर्वस्य मित्रत्वादिकं संप्रतिपद्यते। सिध्यन हस्त

५५ प्रमाणबलेषु हस्तिबलादीनि। हस्त्यादिसंबंधिषु बलेषु कृतसंयमस्य तद्बलानि हस्त्यादिबलानि आविर्भ ४४

र्वंति। तदयमर्थो यस्मिन्हस्तिबले वायुवेगे वा। सिंहवीर्ये वा तन्मयीभावेन संयमं करोति। तितं अवस्यां

मर्थ्यमुक्तं चात्र सर्वस्य
मे

पर

प्राप्ताकृतेषु द्वद्धेषु संस्कारेषु पूर्वजन्मानुभूतानविजात्यादीन्प्रत्यक्षेण पश्यति ॥ सिद्ध्यंतरमाह ॥ प्रत्ययस्य
परचित्तज्ञानं ॥ प्रत्ययस्य परकीयचित्तस्य केनचित्मुखरागादिना लिंगेन गृहीतस्य यदा संयमं क-
परचित्तस्य रोति ॥ तदा परकीयचित्तज्ञानमुत्पद्यते ॥ सरागमस्य चित्तं वीतरागं वेति परचित्तगतान्सर्वानपि धर्मा- ने२
न्जानातीत्यर्थः ॥ अस्यैव परचित्तज्ञानस्य विशेषमाह ॥ न च तत्सालंबनं तस्याविषयीभूतत्वात् ॥ त-
स्य परस्य यच्चित्तं तत्सालंबनं स्वकीयेनालंबनेन सहितं न ज्ञायते ॥ तज्ज्ञानं आलंबनस्य केनचिल्लिं-
गेनाविषयीकृतत्वात् पद्यते सिद्ध्यंतरमाह ॥ बलेषु हस्तिबलादीनि ॥ हस्त्यादिसंबंधिषु बलेषु कृ-
तसंयमस्य तद्बलानि ॥ हस्त्यादिबलानि आविर्भवंति ॥ तदयमर्थो यस्मिन्यस्मिन्हस्तिबले वा बा-
युवेगे वा सिंहे वीर्ये वा तन्मयीभावेन संयमं करोति ॥ तस्य तत्सामर्थ्यं समुद्भवत्यात्सर्वं मस्य

नेषु२ स्प२

मा

पातं॰ ३९ प्रादुर्भवंति ॥ इत्यर्थः ॥ सिद्धांतरमाहा प्रवृत्त्यालोकन्यासात्सूक्ष्मव्यवहितविप्रकृष्टज्ञानं ॥ प्रवृत्तिर्विषयव
तीज्योतिष्मती च प्रागुक्ता तस्यां यो मा आलोकः ॥ सात्विकप्रकाशप्रसरस्तस्य तिविलेषु न्यासात्तदा हृ
षितानां विषयाणां भावनातस्तान्तःकरणो भिंद्रिये सुप्रकृष्टशक्तिता मा प(सूक्ष्म) परमाण्वादि व्यव
हितस्थ व्यवधानगतं निधानादेर्विप्रकृष्टस्य मेर्वीपरपार्श्ववर्त्ति नागराज नादेर्ज्ञानमुत्पद्यते ।
एतत्समानवृत्तांतं सिद्धांतरमाहा भुवनज्ञानं सूर्ये संयमात् ॥ सूर्ये प्रकाशमये यः संयमं क ४५ यम
१स रोतितस्य [illegible] सप्तसु भूर्भुवःस्वःप्रभृतिषु लोकेषु या भुवनानि तत्र सन्निवेशानां जि तेषु य
थावद्व्यवस्थ ज्ञानमुत्पद्यते । पूर्वं सूक्ष्मव्यवस्था सात्विकप्रकाशालंबनं तयोक्तः ॥ इह तु लौकिके व स्तिर
तोयः ॥ लौकिकप्रकाशालंबनं तदाह ॥ तेज वाक्सिद्धांतरमाहा चंद्रे ताराव्यूहज्ञानं ॥ ताराणां ज्योतिषां यो व्यू

45

१शाः ःमी १प्रकाशेन १ताराः

तोविशिष्टः सन्निवेशः तस्मिन् सूर्ये कृतसंयमस्य ज्ञानमुत्पद्यते । सूर्याहृततेजस्कत्वात्ताराणां सूर्यसंयमान्न ज्ञा
नं न शास्त्रोक्तमिति तदर्थमुपायो विहितः । चन्द्रे ताराव्यूहज्ञानम् ॥ ध्रुवे तद्गतिज्ञानम् । तिन्ता नं ध्रुवे निश्चले ज्यो धृ॰२
तिषां प्रधाने कृतसंयमस्य तासां ताराणां या गतिः प्रत्येकं नियतकाला नियतदेशा च तस्या ज्ञा
नमुत्पद्यते । इयं तारा अयं ग्रह इयता कालेनामुं राशिमिदं नक्षत्रं यास्यतीति महज्ज्ञानं तेनोत्पद्यत इत्यर्थः ॥ न४
इदं कालज्ञानस्य फलमित्युक्तं भवति । बाह्याः सिद्धीः प्रतिपाद्यान्तरसिद्धिप्रतिपादयितुमाह । नाभिचक्रे
कायव्यूहज्ञानम् । शरीरमध्यवर्ति नाभिसंज्ञं यत् षोडशारं चक्रं तस्मिन् कृतसंयमस्य योगिनः कायग-
तो योऽसौ व्यूहो रसमलधात्वादीनामवस्थानं तत्र ज्ञानमुत्पद्यते । इदमुक्तं भवति । नाभिचक्रं श-
रीरमध्यवर्ति सर्वतः प्रसृतानां नाड्यादीनां मूलभूतमतस्तत्र कृतावधानस्य समग्रसन्निवेशो यथा-
वद्भासते ॥ सिद्ध्यन्तरमाह । कण्ठकूपे क्षुत्पिपासानिवृत्तिः ॥ कण्ठे गले कूपः कण्ठकूपः जिह्वाया मूले जिह्वातन्तोरधस्तात्कूपस्थ-
कूपः । ग्रीवाकारप्रदेशः प्राणादेर्यत्संस्पर्शात्क्षुत्पिपासादयः प्रादु-

पा॰तं॰ च्छालिंगात्स्वचित्तमात्रं परं ख्यातमागतं। न तु नीलविषयमस्य चित्तं पीतविषयमपि वा। यद्वा न गृहीतं तत्र न स मे
५० स्य कर्तृत्वमप्राकट्यत्वान्नमविषु परचित्तस्य यो विषयस्तज्ज्ञानं। तस्मात्परकीयं चित्तं नालंबनत्वमाहितं। दृ
श्यते। तस्यालंबनस्याग्रहीतया गृहीतत्वात्। चित्तधर्माः पुनर्गृह्यन्त एव। यदा तु किमनेनालंबितमिति।
प्रणिधानं करोति तदा तत्संयमात्तद्विषयमपि ज्ञानमुत्पद्यत एव सिद्धं। तत्र माहात्कायरूपसंयमा ४६
त्तद्ग्राह्यशक्तिस्तंभे चक्षुःप्रकाशासंयोगे। तद्दर्शनं। कायः शरीरं तस्य यद्रूपं चक्षुर्ग्राह्यो गुणः। तस्मि
न्काय इत्यस्मिन्काये रूपमिति संयमात्तस्य रूपस्य यच्चक्षुर्ग्राह्यत्वं रूपाया शक्तिस्तस्याः स्तंभे निर्भावनाव
शात्प्रतिबंधे चक्षुःप्रकाशासंयोगे चक्षुःप्रकाशः सत्वधर्मस्तस्यासंयोगे तद्ग्रहणव्यापाराभा
वे योगिनो तद्दर्शनं भवति। न केनचिदसौ दृश्यत इत्यर्थः॥ एतेन शब्दाद्यंतर्धानमुक्तं॥ सूत्रमेतत्का

नेचभूताद्यंतर्द्धानोपायदर्शने तशब्दादीनां श्रोत्रादिग्राह्याणामंतर्द्धानमुक्तं वेदितव्यं सिद्ध्यंतरमाह। सो
पक्रमं निरुपक्रमं च कर्म तत्संयमादपरांतज्ञानमरिष्टेभ्यो वा। आयुर्विपाकं यत्पूर्वकृतं कर्म तद्द्विप्र
कारं सोपक्रमं निरुपक्रमं च। तत्र सोपक्रमं यत्फलजननाय सहोपक्रमेण कार्यकरणाभिमुख्ये
न वर्त्तते। यथोष्णप्रदेशे प्रसारितमार्द्रं वस्त्रं शीघ्रमेव शुष्यति। उक्तरूपविपरीतं निरुपक्रमं। य
था तदेवार्द्रं वासः संवर्त्तितमनुष्णे देशे चिरेण शोषमेति। तस्मिन्द्विविधे कर्मणि यः संयमं करोति।
किमेतत्कर्म शीघ्रविपाकं किं वा चिरविपाकमित्येवं ध्यानदार्ढ्यादपरांतज्ञानमस्योत्पद्यते। अप
रांतः करणं शरीरवियोगः तस्मिन्ज्ञानमस्मिन्काले अमुष्मिन्देशे मम भविष्यतीति निःसंशयं जा
नाति। अरिष्टेभ्यो वा। अरिष्टानि त्रिविधानि। आध्यात्मिकाधिदैविकभेदेन। तत्राध्यात्मिका निपि

पातं ४१ हितकर्मः ८ कोष्ठस्पन्दायोर्योयं नश्वतो ति। स्थेमादीनि। आधिभौतिकाश्च कस्मात् ईड्डि रूतरुकपद
र्शनादीनि। आधिदैविकाश्च कांडपवङ्कुमगाकाङ्स्वर्गादिपदार्थदर्शनादीनि तेऽस्य शारीरकालंऽ।
नाति। यद्यपि योगिनामप्यरिष्टेभ्यः प्रायेणाज्ञानमुत्पद्यते। तथापि तेषां सामान्याद्कारणानुसं ४१
ज्ञायां योगिनां पुनर्नियत देशकालतया प्रत्यक्षवदव्यभिचारि। पासकिर्मतिम्यंदश्वनासिद्धिर्भवति पा
दिवमाह। मैत्र्यादिषु बलानि। मैत्रीकरुणामुदितोपेक्षा सुयोविहितस्यमस्य फलानि तासां मैत्र्यादी
नां तासां संयमाद्विनी प्रादुर्भवंति। मैत्र्यामुदिताकरुणास्वया स्यप्रकर्षेण भवति। यथा सर्वस्य मित्रत्वादिकं
प्रत्यक्षवद्भासते। सिद्ध्यंतरमाह। कंठकूपे क्षुत्पिपासानिवृत्तिः। कंठे गले कूपः। कंठकूपः। जिह्वा
यामूले जिह्वादंतोरधस्तात्कूपवत्कूपः। गर्ताकारप्रदेशः। प्राणादेर्यत्स्पर्शात्क्षुत्पिपासादयः

51/2

र्भवंति। तस्मिन्नुन्नतमीय मध्यपो।ि नंतोऽत्यिपामादयो निवर्त्तंते। घंटिकाओनम्प्रोथमसिथमाने तस्मिन्ना।
वितनचत्येवंविधासिद्धिः। सिद्ध्यंतरमाह। ऊर्ध्वनासापां स्थैर्यं कंठकूपछ्याधपाहृडा ऊर्मीव्योमनाडी। तस्यां
हृत्तमंथमध्यवेतमश्छेदें संस्तयद्याते। तस्यानमतुपविहस्थवफलतानवती त्यर्थः। यद्दिवाकायस्थैर्य
सुत्पद्यते। न केनचित्स्पंदयितुं शक्यत इत्यर्थः। सिद्ध्यंतरमाह। मूर्ध्नज्योतिषि सिद्धदर्शनं। शिरःकपा
लेब्रह्मरंध्रांतं छिद्रंप्रकाशाधारत्वाज्ज्योतिः। यथाग्रहाभ्यंतरस्थस्य मणेः प्रसरंती प्रभा कुंचि
काविवरप्रदेशेसंघटते। तथा हृदयस्थः सात्त्विकः प्रकाशः प्रसृतस्तत्र संपिंडितत्वं भजते। तत्र
हृत्तमंठमध्यप्रेद्यावापृथिव्योरंतरालवर्तिनः सिद्धा दिव्याः पुरुषास्तेषामितरत्राप्रासौल्पे द्रपा
नां तस्य दर्शनं भवति। तान्पश्यति तैः सह संभाषते इत्यर्थः। सर्वज्ञत्वोपायमाह। प्रातिभाद्वा सर्वं

त

पातं०
५२
सर्वदे

निमित्ता नापेक्षमाणो मात्रजन्यं च विमर्शं वा दंकां [illegible] हिं त्यत्य प [illegible] मानं ज्ञानं प्रतिभातं च्छां संप्र मे क्रियमाणे ऽप्रा
विसंनि वेकख्यातेः सर्वथा वितारकज्ञानमुत्पद्यते यथोद्देश्यति सविनरिस्वंप्र[illegible]या दुर्लभतितद्दृढविवेक
ख्याते सर्वं तारकं विषयं ज्ञानमाविर्भवतीति निश्चितमिति सर्वं मां स्वरानपेक्षं सर्वं जानातीत्यर्थः। सिद्ध्यंतरमाह ४२
हृदये चित्तसंविदिति हृदयं शरीरस्य प्रदेशविशेषः। तस्मिन्नधोमुखपुण्डरीकाकारं तत्र अंतःकरण[illegible]
[illegible]स्थानीं तत्र [illegible]कृतसंयमस्य स्वपरचित्तज्ञानमुत्पद्यते स्वचित्तगतान् वासनाः परचित्तगतान्
रागादीन् जानातीत्यर्थः। सिद्ध्यंतरमाह। सत्त्वपुरुषयोरत्यंतासंकीर्णयोः प्रत्ययाविशेषो भोगः। प
रार्थात्स्वार्थसंयमात्पुरुषज्ञानं। सत्त्वं प्रकाशसुखात्मकं प्राधानिकः परिणामविशेषः। पुरुषो
के [illegible]बुद्धिसाक्षात्स्वरूपप्रयोग्योऽर्थसं[illegible]स्वरूपत्वाच्चेतनत्वात्तयोरत्यंतासंकीर्णयोर्भिन्नत्वमित्यर्थः। ते[illegible]र्थः प्रत्य प्रत्यया

कौ
नाचेतनः
ःया

सं २

विशेषोऽभेदेनाप्रतिसन्धानसम्भाना सत्यमेवैकर्तृतायां। प्रत्ययेन यावत् सुखदुःखसंवित्त्यालोगः सत्यमेवार्थे
नैरपेक्ष्येणापरार्थः सुखसार्थस्तस्मात् तयोर्यं स्वार्थः सुखदुःखरूपमात्रावलीवनः परित्यक्ता हंकारे
सत्वेयावित्तीयाग्रहोति स्वत्वं तत्त्वमयमस्य सुखदुःखविषयं ज्ञानमुत्पद्यते। न त्वतदर्थरूपस्यावलीवनं
सत्वामत्वनिष्ठं सुखमोज्ञानानि सम्भवन्तः स सुखवो ज्ञाता ज्ञाता स्वविषयस्वावमापद्यते ज्ञेयत्वाप
त्तेः ज्ञातृज्ञेययोश्च पर्यायोऽस्त्यास्यं न विरोधात् । अस्त्येव हीयमस्य फलमाहा। तत्संप्रातिस्विकं बोध
नादर्शे छिद्रे वाऽभाशान्तायां तात न नः सुखमसंयमादस्यस्य मानास्तु छिन्नस्या विज्ञानानि जायन्ते। न च
ति नं सर्वे यैकांशा नं तस्या विज्ञानाय सूक्ष्मादि कमर्थे प्रत्युत्पत्तिश्चावत्रांशो इन्द्रियजं ज्ञानं तस्मात् व य
स्तु छा हि यं दिवि न वंशाबीजानाति वेदना स्पर्शनेन्द्रियजं ज्ञानं विद्यते न ये ति द्रुत लतां क्रियासञ्ज

श्रोतेंद्रियमुच्यते। वर्त्तते गंधविषय इति कृत्वा। ३७

:१ दर्श ४ ×

पातं० याश्चवक्ष्यिपते। तस्माद्दिव्यं स्पर्शविषयं ज्ञानमुत्पद्यते। आश्चक्षुरिंद्रियजंज्ञानं। आसमंताद्दृश्यतेऽनुभूयते
५२ रूपमनेनेति निरुक्त्वा तस्मिन्प्रकर्षाद्दिव्यं रूपज्ञानमुत्पद्यते। आस्वादो रसनेंद्रियजंज्ञानं। आस्वाद्यतेऽनेने
ति कृत्वा तस्मिन्प्रकृष्टे दिव्ये रसे संविदुत्पद्यते। वार्त्ता गंधसंवित्ः वृत्तिशब्देन तांत्रिक्या परिभाषया
घ्राणेंद्रियमुच्यते। वार्त्ता गंधसंवित्ः तस्यां प्रकृष्टमाणायां दिव्यो गंधोऽनुभूयते। एतेषां फलविशेष ५८
५० णां विषयस्तदाह। ते समाधावुपसर्गा व्युत्थाने सिद्धयः॥ तेषां कथितानां॥ फलविशेषाणां॥ समा
धेः प्रकर्षं गच्छत उपसर्गा उपद्रवा विघ्नकारिणः। हर्षविस्मयादिकरणेन समाधिः शिथिलीभव
ति। व्युत्थाने तु नर्थे वहारदशायां विशिष्टफलदायकत्वात्सिद्धयो भवंति। सिद्ध्यंतरमाह। बंधका
रणशैथिल्यात्प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः॥ व्यापकत्वादात्मचित्तयोर्नियतकर्म

मनःकर्मवशादेव शरीरांतर्गतयोरेव तयोर्भोक्तृभोग्यभावेन संवेदनमुत्पद्यते। स एव शरीरे बंधः। तच्च

तीव्रनयदा समाधिवशाद्बंधकारणधर्माधर्माख्यं कर्म शिथिलं भवति। ज्ञानेन मा पद्यते। चित्तस्य च यो

सोऽपसारो हृदयप्रदेशादिंद्रियद्वारेण विषयाभिमुख्येन प्रसरस्तस्य संवेदनं ज्ञानं इयं चित्तव

हानाडी अनया चित्तं वहति। इयं रसप्राणादिवहाभ्यो नाडीभ्यो विलक्षणा इति स्वपरशरीरयोर्य

दा शरीरस्य संचारं जानाति तदा परकीयं शरीरं मृतं जीवच्छरीरं वा चित्तसंचारद्वारेण प्रविशति

चित्तं च परशरीरे प्रविशदिंद्रियाण्यनुवर्तंते। मधुकरराजमिव मक्षिकांतत ४ परशरीरं प्रविष्टो यो

योगी स्वशरीरवच्चैन व्यवहरति। व्यापकयोश्चित्तपुरुषयोर्भोगसंकोचे कारणं। कर्म स्वबे

समाधिना क्षिप्तं तदा स्वातंत्र्यात्सर्वत्रैव भोगनि ३८ सिद्धं तत्र मा हा उदानजयाज्जलपंककंट

पातं० कादिष्वसंग उत्क्रांतिश्च॥ समस्तानामिंद्रियाणां तुषज्वालावद्या युगपदुत्थिता वृत्तिः॥ सा जीवनश
४५ ब्देन वाच्या तस्याः क्रियाभेदात्प्राणापानादिसंज्ञाभिर्व्यपदेशः॥ तत्र हृदयान्मुखनासिकाद्वारेण वायोः प्र
णयनात्प्राण इत्युच्यते। नाभिप्रदेशात्पादांगुष्ठपर्यंतमपनयनादपानः। नाभिप्रदेशं परिवेष्ट्य ४८
समंतान्नयनात्समानः। कृकाटिकादेशादाशिरोवृत्तेरुन्नयनादुदानः। व्याप्य नयनात्सर्वशरीर
३५ व्यापी व्यानः॥ तत्रोदानस्य संयमद्वारेण जयादितरेषां वायूनां निरोधादूर्ध्वगतित्वे जले महानद्यादौ
महति वा कर्दमे तीक्ष्णेषु कंटकेषु वा न सज्जते॥ अतिलघुत्वात्तूलपिंडवज्जलादावनिमज्ज उद्
५१ गच्छतीत्यर्थः॥ सिद्ध्यंतरमाह॥ समानजयाज्ज्वलनं। अग्निमावेष्ट्य व्यवस्थितस्य समाना
ख्यस्य वायोर्जयात्तीयमन्नवशीकारान्निरावरणाच्चाग्नेरुद्भूत्या तेजसा ज्वलन्निव योगी प्र

ज२ दु

तिनाति। सिद्ध्यंतरमाह। श्रोत्राकाशयोः संबंधसंयमाद्दिव्यं। श्रोत्रं कारि श्रोत्रं शब्दग्राहकमाहंकारिकमि
न्द्रियं। आकाशं व्योम शब्दतन्मात्रकार्यं तयोः संबंधो देशदेशिभाव लक्षणस्तस्मिन्कृतसंयमस्य योगि
नो दिव्यं। श्रोत्रं प्रवर्त्तते। युगपत्सूक्ष्मव्यवहितविप्रकृष्टशब्दग्रहणसमर्थं भवतीत्यर्थः।। सिद्ध्यंत नू२
रमाह। कायाकाशयोः संबंधसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनं। कायः पांचभौतिकं शरी
नावप र। तस्याकाशेनावकाशदायकेन यः संबंधः। तत्र संयमं विधाय लघुनि तूलादौ समापत्तिं तन्मयीभावं ल
क्षणां विधाय प्राप्तात्यंतलघुभावो योगी प्रथमं यथारुचि जले संचरन्क्रमेणोर्णनाभतंतुजालेन
संचरमाणः आदित्यरश्मिभिश्च विहरन्यथेष्टमाकाशेन गच्छतीति। सिद्ध्यंतरमाह। बहिरकल्पिता वृ
त्तिर्महाविदेहा ततः प्रकाशावरणक्षयः। शरीराद्बहिर्या मनसः शरीरनिरपेक्षेण वृत्तिः सा म
यी १

पातं हाविदेहा नामाभिहिता शरीराहंकारदार्ढ्यहारणी ख्याता। ततः तस्यां कृतायां संयमायां प्रकाशावर
४५ णात्मकः सात्त्विकस्य चित्तस्य यः प्रकाशस्तस्यावरणं क्लेशकर्मादि तस्य क्षयः प्रविलयो भवति।
अयमर्थः। शरीराहंकारसमन्वितेन मनसा या बहिर्वृत्तिः साकल्पिता तस्यां सत्यां यदा तु तेन शरीरा ५०
५० हंकारेणानवच्छिन्नरूपत्वात् स्वेनैव मनसा वृत्तिः साकल्पिता। तस्यां संयमायां योगिनः सर्वे विषयमला
ः क्षीयन्ते। तदेवं पूर्वान्तविषया अपरान्तविषया मध्यभवाश्च सिद्धीः प्रतिपाद्यानन्तरं भुवनज्ञाना
दिरूपा बाह्याः कायव्यूहादिरूपाश्चाभ्यन्तरपरिकर्मनिष्पन्दभूताश्च मैत्र्यादिषु बलानीत्येवमा
धु २ द्याः समाधिरूपयोगिनीश्चान्तःकरणबहिःकरणलक्षणेन्द्रियसर्वाः प्राणादिव्याख्यतवाद्याः। घ २
सिद्धीश्चित्तदार्ढ्योपसमाधेः समासोत्पन्नाय प्रतिपाद्येदानीं स्वदर्शनोपयोगिसबीजनिर्बीजस

र्थो धा

जय४१

मादि सिद्धयो विविधोपायप्रदर्शनायाह॥ स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः॥ पंचानां पृथिव्याद
नां भूतानां ये पंचावस्थाविशेषरूपा धर्माः स्थूलादयस्तत्र कृतसंयमस्य भूतजयो भवति। भूतानि वश्या
न्यस्य भवंतीत्यर्थः। तथा हि भूतानां परिदृश्यमानं विशिष्टाकारवत्स्थूलं रूपं स्वरूपं यथाक्रमं का
र्श्य स्नेहोष्णता प्रेरणावकाशदानं लक्षणं। सूक्ष्मं च यथाक्रमं भूतानां कारणत्वेन व्यवस्थितानि
तन्मात्राणि। अन्वयिनो गुणाः प्रकाशप्रवृत्तिस्थितिरूपतया सर्वत्रैवान्वयित्वेन समु
पलभ्यंते अर्थवत्त्वं तेष्वेव गुणेषु भोगापवर्गसंपादनाख्या शक्तिरेवं भूतेषु पंचस्ववस्थासु लक्षणाव क्र ३
स्था। मित्रेषु प्रत्यवस्थं संयमं कुर्वन्योगी भूतजयी भवति। तद्यथा प्रथमं स्थूले रूपे संयमं विधाय तद
नु सूक्ष्मरूप इत्येवं क्रमेण कृतसंयमस्य संकल्पानुविधायिन्यो वत्सानुसारिण्य इव गावो भूतप्रकृतयो

हा १ नू २

पा०तं० भवंति। तदेव भूतजयस्य फलमाह॥ ॥ ततोणिमादिप्रादुर्भावः कायसंपत्तद्धर्मानभिघात
४६ श्च॥ अणिमा परमाणुरूपतापत्तिः। लघिमा तूलपिंडवल्लघुत्वप्राप्तिः। महिमा महत्वप्राप्तिः।
सौ० अंगुल्यग्रेण चंद्रादिस्पर्शनशक्तिः प्राकाम्यं इच्छानभिघातः। शरीरांतःकरणेशित्वं सर्वत्र
प्रभविष्णुता। वशित्वं सर्वाण्येव भूतानि अनुगामित्वात्तदुक्तं नातिक्रामंति। यत्र कामावसा ५१
यित्वं यत्र कामावसायो यस्मिन्विषये अस्य कामः इच्छा भवति। तस्मिन्विषये योगिनो व्यवसा
यो भवति। तं विषयं स्वीकारद्वारेणाभिलाषसमाप्तिपर्यंतं नयतीत्यर्थः। एतेऽणिमाद्या
ः समाधिफलपयोगिभूतजयाद्योगिनः प्रादुर्भवंति। यथा परमाणुत्वप्राप्तेर्वज्रादिकानप
न्तः प्रविशति। एवं सर्वत्र योज्यं। एतेऽणिमादयोऽष्टौ गुणा महासिद्धय इत्युच्यंते। कायसंप

51

इच्छाप्रमाणतां प्राप्नोति । तद्धर्मानभिघातश्च तस्य कायस्य ये धर्मा रूपादयस्तेषामभिघातो नाशो
न कुतश्चिदपि भवति । नास्य रूपमग्निर्दहति । न च वायुः शोषयतीत्यादि ॥ योऽर्थः कायसंपद
माह ॥ ॥ रूपलावण्यबलवज्रसंहननत्वानि कायसंपत् । रूपलावण्यबलानि प्रसिद्धा
नि । वज्रसंहननत्वं वज्रवत्कठिना संहतिरस्य शरीरे भवतीत्यर्थः ॥ इति कायस्याविर्भूत
गुणसंपत् ॥ एवं भूतजयमभिधाय प्राप्तभूमिकस्येन्द्रियजयमाह ॥ ॥ ग्रहणस्वरूपास्मि
तान्वयार्थवत्त्वसंयमादिन्द्रियजयः । ग्रहणमिन्द्रियाणां विषयाभिमुखी वृत्तिः । स्वरूपं
सामान्येन प्रकाशत्वं । अस्मिता अहंकारानुगमः । अन्वयार्थवत्त्वे पूर्ववत् । एतेषामिन्द्रिया
णामवस्थापञ्चके प्रत्येकं संयमं कृत्वा इन्द्रियजयो भवति । तस्य फलमाह ॥ ततो मनोजवित्वं

ताता२

पातं विकरणभावश्च प्रधानजयश्च। शरीरस्य मनोवद्द्रुतगामित्वं मनोजवित्वं कायनिरपे
४७ क्षाणामिन्द्रियाणां वृत्तिलाभो विकरणभावः। सर्ववशित्वं प्रधानजयः। एताश्च सिद्धयो जितेन्द्रि
